देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

प्रथमवर्षम् ( २०१७ ) ३-४ अङ्कौ

जनवरी-मार्च, अप्रैल-जून २०१७



वार्तावली या रघुनाथकीर्त्तेर्ज्ञानस्य गङ्गा प्रतिभाति सङ्गा।
भागीरथी भाग्यविकासिनी या साल्कायुतानन्दविधायिनी स्यात्।।

**प्रधानसम्पादकः**
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

**परामर्शदातृमण्डलम्**
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः

**सम्पादकाः**
डा. शैलेन्द्रनारायणकोटियालः
डा. मनीषजुगरानः
श्री श्रीओमशर्मा

'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

**रघुनाथवार्तावली**

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडी-गढवालः
(उत्तराखण्डः)-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org

# पुरोवाक्

भगवतः पुरुषोत्तमस्य श्रीरघुनाथस्य कृपया रघुनाथवार्तावल्याः अयं संयुक्ताङ्कः (तृतीय-चतुर्थौ अङ्कौ) समयेन प्रकाश्यते इति महान् सन्तोषः। इतः पूर्वं दिसम्बर-मासे अस्याः त्रैमासिक-पत्रिकायाः द्वौ अङ्कौ संयुक्तप्रवेशाङ्करूपेण प्रकाशितौ, यत्र षण्मासाभ्यन्तरे परिसरे सम्पन्नानां विविध-कार्यक्रमाणां सर्वं वृत्तजातं सचित्रं प्रकाशितमस्ति। स चाङ्कः इदानीं परिसरीये अन्तर्जाले अपि द्रष्टुं शक्यते। अस्मिन्नङ्के पुनः जनवरी-मासादारभ्य जूनमासं यावत् परिसरे प्रवर्तितानां शैक्षिक-सांस्कृतिक-सारस्वत-कार्यक्रमाणां विवरणं सबहुमानं प्रकाश्यते। सहैवात्र नियमितरूपेण प्रकाशितानि परिसरीय-प्राध्यापकानां छात्राणाञ्च लघुकाव्यानि तेषां कविप्रतिभां सुतरां द्योतयन्ति। व्याकरण-साहित्य-ज्योतिष-वेद-न्यायादि-विभागेषु आचार्य-सहाचार्य-सहायकाचार्य-पदेषु नियुक्तानां स्व-स्व-शास्त्र-निष्णातानां प्राध्यापकानां मार्गदर्शने प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षासु प्रायः शतं छात्रैः नियमितरूपेण शिक्षाग्रहणं प्रारब्धमस्ति। उपर्युक्तैः पारम्परिक-विषयैः समं स्नातक-समकक्षानां हिन्दी-अंग्रेजी-इतिहास-सङ्गणकविज्ञान-(कंप्यूटर-साइंस)-सदृशानामाधुनिक-विषयाणामौपचारिकं ज्ञानमपि परिसरे प्रदीयते। संस्कृते सम्भाषणं प्रोत्साहयितुमनौपचारिकरूपेणात्र सम्भाषण-संस्कृत-कक्षाः अपि सञ्चाल्यन्ते। ग्रीष्मावकाशे राष्ट्रिय-संस्कृत-संस्थानस्य संस्कृत-स्वाध्याय-पाठ्यक्रमं पुरस्कृत्य निःशुल्कमावासीयं दशदिवसात्मकं संस्कृत-सम्भाषण-शिविरं सञ्चालितम्। सहैवात्र राष्ट्रिय-संस्कृत-संस्थानस्य विद्यावारिधि-(पीएच.डी.)-उपाधये उद्दिष्टः शोध-पाठ्यक्रमः अपि प्रारब्धोऽस्ति। परिसरेऽस्मिन् समये समये विविध-शैक्षिक-सांस्कृतिक-कार्यक्रमाः समनुष्ठिताः भवन्ति। अत्र प्रत्येक-विभागपक्षतः राष्ट्रीय-संगोष्ठीनां तथा विशिष्ट-व्याख्यानानामायोजनमपि क्रियते। परिसरे २३.१.१७ तः ३१.१.१७ दिनाङ्कं यावद् विविध-विभागीया राष्ट्रीय-संगोष्ठ्यः विशिष्ट-व्याख्यानमालाश्च सम्पन्नाः। परिसरेऽस्मिन् रघुनाथवार्तावलीं विहाय अन्यासां तिसृणां पत्रिकाणां प्रकाशनमपि प्रस्तावितं वर्तते यासां प्रकाशनमचिरादेव भविष्यति। अपि च अस्मिन्नवधौ षण्णां विभागीय-पत्रिकाणां प्रकाशनं सम्पन्नमस्ति। न केवलमेतदपितु अन्तःपरिसरीय-कार्यक्रमेषु भागं गृहीत्वा परिसरछात्राः साफल्यमर्जयन्तीति गौरवमनुभवामः।

शोधविभागाध्यक्षस्य प्रो. बनमालीबिश्वालस्य परामर्शेणात्र विविध-शोधयोजनाः (यथा संगोष्ठी-कार्यशालादि-योजनाः पत्र-पत्रिका-पुस्तक-प्रकाशन-योजनाः, पुस्तकालय-समृद्धियोजनाश्च) प्रस्ताविताः सन्ति, याश्च अत्रत्यायां स्थानीय-शोधसमितौ स्वीकृताः सत्यः अचिरादेव कार्यान्विताः भवितुमर्हन्ति। उत्तराखण्डस्य आचार्याणां विदुषां च संस्कृतवाङ्मये यद् विपुलं योगदानं वर्तते तद्विषये चर्चा अत्यावश्यकी। अतः परिसरे उत्तराखण्डविद्यावैभवम् इति विषयमाश्रित्य त्रिदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी अपि प्रस्ताविता अस्ति। अग्रिमेषु सत्रेषु शैक्षणिक-शोधपरक-कार्यशालानामपि प्रस्तावः उपस्थापितः। परिसरे कञ्चन समृद्धं पुस्तकालयं (पुस्तकानां हस्तलेखानाञ्च) प्रतिष्ठापयितुं प्रस्तावः विहितः। भारतवर्षस्य न कस्मिन्नपि पुस्तकालये आधुनिक-संस्कृत-साहित्यस्य विविध-विधान्तर्गतानां पुस्तकानां सामग्रिकं संकलनं विद्यते। अतः परिसरीये पुस्तकालये आधुनिक-संस्कृत-साहित्यस्य कश्चन विशेषः खण्डः प्रतिष्ठापयिष्यते। एवमेवात्र प्राचीन-दुर्लभ-महत्त्वपूर्ण-हस्तलेखानां संग्रहार्थं संरक्षणार्थं च कश्चन विशेषः प्रयासः विधास्यते। परिसरस्यास्य शुभोद्घाटनादारभ्य अद्यावधि अस्मिन् नवमासाभ्यन्तरे काचन विशिष्टा एव प्रगतिः सञ्जाता इति वक्तुं शक्यते। इदानीं परिसरस्य प्राचीर-(बाउण्डरी)-निर्माणकार्यं प्रारब्धमस्ति। अग्रिमेषु सत्रेष्वत्र काचित् सङ्गणक-प्रयोगशाला (Computer lab) अन्तर्जाल-सौविध्येन सह प्रतिष्ठापयिष्यते।

एवं शिक्षा-संस्कृति-क्षेत्रे परिसरोऽयं न केवलं देवप्रयागस्य किन्तु समग्रोत्तराखण्डस्य मार्गदर्शनं कर्तुं शक्ष्यतीति शम्।

**के.बी. सुब्बरायुडुः**
प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## सम्पादकीयम्


'रघुनाथवार्तावली' इतीदं नूतनं पुष्पं भवतां करकमलेषु समर्पयन्तः महान्तं सुखमनुभवामो वयम्। अत्यन्तम् अल्पीयसा कालेनैव देवप्रयागस्थेनानेन श्रीरघुनाथस्यैव नाम्ना संस्थापितेन श्रीरघुनाथकीर्तिपरिसरेण स्वीया कीर्तिः सर्वत्र प्रसारिता। यथा खलु पुष्पं सर्वासु दिक्षु स्वीयं गन्धं प्रसार्य ताँस्तान् लोकान् आह्लादयति तथैव परिसरकीर्तिप्रसारणे अत्र 'रघुनाथवार्तावली'-पत्रिकायाः प्रथमः संयुक्ताङ्कोऽपि कारणीभूतः। अत्यन्तम् अल्पसंसाधनेषु सत्स्वपि प्रथमस्य अङ्कस्य सफलतापूर्वकं प्रकाशनेन प्रसारणेन सममस्माभिः अस्मिन् प्रकाशनकर्मणि अपि महान् उत्साहानुभवश्च आसादितः। इतः परमपि इयं 'रघुनाथवार्तावली' नियतरूपेण प्रकाशतां गच्छेदिति यतिष्यामः।

परिसरेण अस्मिन् एकवर्षादपि न्यूने काले नैकेषु नूतनेषु उपक्रमेषु पादनिक्षेपाः कृताः। २३ जनवरी, २०१७ तः ३१ जनवरी, २०१७ पर्यन्तं परिसरे षट्सु विभागेषु द्विदिवसीयाः राष्ट्रिय-सङ्गोष्ठ्यः सफलतापूर्वकं समायोजिताः, यासु खलु देशस्य नैकेभ्यः कोणेभ्यः स्थानेभ्यो वा विद्वन्मणयः समागत्य स्वीयेन रचनापाटवेन अनुसन्धानचातुर्येण च शोधपत्राणि प्रास्तुवन्। अनुसन्धानक्षेत्रे एतादृशेनानेन उपक्रमेण नूनम् अनुसन्धानस्य नवीनाः आयामाः समुद्घाटिताः भवन्ति। विशेषतोऽत्र आधुनिकविषयविभागेन समायोजितायाः सङ्गोष्ठ्याः चर्चा उल्लेख्या वर्तते। अस्यां सङ्गोष्ठ्याम् उपशतं विद्वांसः शोधार्थिनश्च समुपस्थाय स्वीयानि शोधपत्राणि प्रस्तुतवन्तः। अनेन ज्ञायते यत् अस्मिन् गढवालक्षेत्रे एतादृशानां कार्यक्रमाणाम् उपक्रमाणां च महती आवश्यकता वर्तते। परिसरस्य साहित्यविभागेन २४.०१.२०१७ तमे दिनाङ्के 'अखिलभारतीयकविसम्मेलनम्' आयोजितम्। यत्र देशस्य विंशत्यधिकाः प्रसिद्धाः कवयः काव्यपाठमकुर्वन्। एतस्मिन् एव काले परिसरे प्रत्येकं विभागेन विशिष्टव्याख्यानमाला अपि आयोजिताः, यासु संस्कृतजगतो मूर्धन्याः विद्वांसः समुपस्थाय तत्तद्विषयेषु ज्ञानगभीरान् विषयान् प्रस्तुतवन्तः। परिसरेण चतस्रः पत्रिकाः अनुसन्धानपत्रिकाः (जर्नल्स्) च प्रकाश्यन्ते। प्रत्येकं विभागेन च पृथक्-पृथक् षट् शोधपत्रिकाः अपि प्रकाशिताः एवम् अस्मिन् प्रप्रथमे एव वर्षे दश पत्रिकाः प्रकाशिताः भविष्यन्ति। संस्कृतस्य प्रचारे, शास्त्र-अनुसन्धानयोः क्षेत्रे संयोजने च एतादृशानां सारस्वतकर्मणां बहु महत्त्वं भवति। जानन्ति एव विज्ञाः यत् संस्कृत-पत्रकारितया संस्कृतस्य महान् प्रचारो जातः। साम्प्रतं तु 'संस्कृत-पत्रकारिता' इति नूतनम् अध्ययनक्षेत्रमेव विकसितं जातम्। अपि च परिसरेऽस्मिन् आधुनिकसाहित्यसंसाधनकेन्द्रम् (Resource Centre of Modern Sanskrit Literature) पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रम् (Centre for Manuscript Preservation and Research) इत्येते स्थापयितुमपि सङ्कल्पना वर्तते, तथैव अस्मिन् सत्रे कविशिक्षा-अनुवादयोः विषयेऽपि कार्यशाले आयोजयिष्येते। परिसरे वार्षिक्यः क्रीडा-सांस्कृतिक-शैक्षिणिकाः स्पर्धाः आयोजिताः अभवन्, यत्र छात्राः भागग्रहणपुरस्सरं स्वीयं पाटवं प्रस्तुतवन्तः वार्षिकोत्सवकार्यक्रमे बहवः छात्राः पुरस्कृताः च। अन्तःपरिसरीय-कार्यक्रमेष्वपि छात्राः भागं गृहीत्वा पुरस्कृताः प्रशंसिताश्च अभवन्।

नवदेहल्यां कौमुदीमहोत्सवे परिसरच्छात्रैः श्रीनागराजरावप्रणीतं 'दाम्पत्यकलहम्' इति नाटकं प्रस्तुत्य अभिनयकौशल-प्रस्तुत्यर्थं तत्र महती प्रशंसा समधिगता। एवम् अल्पेनैव कालेन परिसरः प्रगतिपथं समारूढः। अधुना तु परिसरस्य भवनानां निर्माणकार्यमपि द्रुतगत्या प्रचलदस्ति। एवं प्रकारेणायं परिसरः बहुमुखीं प्रोन्नतिं प्राप्नुवन् राराजते।

-सम्पादकाः

## प्रतिस्पन्दः




राष्ट्रिसंस्कृतसंस्थानस्य अचिरादेव संस्थापितेन देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरेण प्रकाशितायाः त्रैमासिकवार्तापत्रिकायाः **'रघुनाथवार्तावली'**त्याख्यायाः प्रवेशाङ्कः अत्यन्तं रुचिकरः ज्ञानवर्द्धकसामग्रीयुतः परिसरपरिवारस्य नैकविधमहत्त्वपूर्ण-उपलब्धिभिः सह समन्वितः अस्ति। एतत्पत्रिकामुखेन परिसरे आयोज्यमानानां शैक्षिकानां, सांस्कृतिकानां सर्जनात्मककार्यक्रमाणां च विस्तृता संसूचना प्राप्यते। अस्याः पत्रिकायाः प्रकाशनार्थं सम्पादकमण्डलाय परिसरपरिवाराय च हार्द्यः शुभकामनाः।


शुभेच्छुः

**विनोदपण्डितः**

प्राध्यापकचरः (इतिहासः) राजकीयमहाविद्यालयः, देवप्रयागः (उत्तराखण्डः)

विशिष्टंसत्रम्

## व्याकरणविभागीया राष्ट्रिया सङ्गोष्ठी



उद्घाटनसत्रे मञ्चसञ्चालनं कुर्वन् श्रीओमशर्मा मञ्चे विशिष्टाश्च

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थ–श्रीरघुनाथकीर्तिपरिसरे व्याकरणविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २३.०१.२०१७ तः २४.०१.२०१७ दिनाङ्कं यावत् समायोजिता। द्विदिवसीयायाः अस्याः राष्ट्रियसङ्गोष्ठ्याः केन्द्रीयो विषयः आसीत्–"महाभाष्यस्य लौकिकालौकिकोपयोगित्वम्।" अस्यां सङ्गोष्ठ्याम् आहत्य पञ्च सत्राणि समायोजितानि। अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रं २३.०१.२०१७ तमे दिनाङ्के सम्पन्नम्। अस्मिन् उद्घाटनसत्रे मुख्यातिथित्वेन कोलकातास्थ–कोलकाताराष्ट्रियसंस्कृत–महाविद्यालयस्य (मानितविश्वविद्यालयस्य) प्राच्यविद्याविभागाध्यक्षः डा. तन्मयकुमारभट्टाचार्यः समुपस्थितः। उद्घाटनसत्रस्यास्य आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। सरस्वतीसमर्चनपुरस्सरं माल्याद्यर्पणेन सह सङ्गोष्ठ्याः समारम्भो जातः। ततो वैदिकलौकिकमङ्गलाचरणौ समुपस्थापितौ। अवसरेऽस्मिन् परिसरस्य व्याकरणविभागाध्यक्षः प्रो. बनमालीबिश्वालमहोदयोऽपि मञ्चे विराजितः आसीत्। अस्मिन् सत्रे मञ्चसञ्चालनं श्रीश्रीओमशर्मणा अपि च समागतानाम् आतिथीनां धन्यवादज्ञापनं डॉ. आर. बालमुरुगनमहोदयेन विहितम्।




सङ्गोष्ठ्यां शोधपत्रं प्रस्तुवन् डॉ. श्रेयांशद्विवेदी

ततः अस्मिन् दिवसे एव द्वे सत्रे प्रचलिते। द्वितीये सत्रे प्रस्तोतृभिः पञ्च शोधपत्राणि उपस्थापितानि। अस्य सत्रस्य संयोजनं व्याकरणप्राध्यापकेन श्रीश्रीओमशर्मणा विहितम्। प्रो. बनमालीबिश्वालमहोदयेन महाभाष्यस्य लौकिकन्यायानां सूक्तीनाञ्च सम्यक् पावरपाइंट–प्रदर्शनं कृतम्। ततश्च तृतीये सत्रेऽपि प्रस्तोतारः पञ्च शोधपत्राणि प्रस्तुतवन्तः। अस्य सत्रस्य संयोजनं डॉ. शैलेन्द्रनारायणकोटियालमहोदयेन विहितम्। अस्मिन् सत्रे हरियाणसंस्कृतअकादमीतः समागतेन डॉ. श्रेयांशद्विवेदिना तथा श्रीश्रीओमशर्मणा महाभाष्यविषयकानि वैदिकलौकिकानि प्रयोजनानि प्रस्तुतानि। पुनश्च अग्रिमे दिने पूर्वाह्णे व्याकरणविभागीयायाः अस्याः सङ्गोष्ठ्याः सत्रमेकं प्रचलितम्। अस्मिन् सत्रे पञ्च शोधपत्राणि प्रस्तुतानि। अस्मिन् सत्रे डॉ. अभिजितदीक्षितमहोदयेन महाभाष्ये व्यावहारिकन्यायः इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। तेन महोदयेन उक्तं यत्–महाभाष्यस्थ–न्यायान् गृहीत्वा अहं 'एनीमेशन चलचित्रनिर्माणं' कुर्वन्नस्मि। अनन्तरं डॉ. सुरेशशर्मणा महाभाष्ये कृषिविषयकविचारः प्रस्तुतः।

अस्याः सङ्गोष्ठ्याः सम्पूर्त्तिसत्रं २४.०१.२०१७ तमे दिनाङ्के सम्पन्नम्। सम्पूर्त्तिसत्रेऽस्मिन् मुख्यातिथित्वेन हरिद्वारस्थस्य भगवान्दाशआदर्शसंस्कृतमहाविद्यालयस्य प्रसिद्धो विद्वान् डा. निरञ्जनमिश्रः समुपस्थितः। अस्य सत्रस्य आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। एवम् अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य १५ विद्वांसः शोधपत्राणि प्रास्तुवन्। इयञ्च सङ्गोष्ठी अतीव सफलतया सम्पन्ना। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं प्रो. बनमालीबिश्वालमहोदयः आवहत् तथा च सहसंयोजकदायित्वं श्रीश्रीओमशर्मणा विहितम्।

## व्याकरणविभागीया विशिष्टव्याख्यानमाला



विशिष्टव्याख्यानं कुर्वन् प्रो. विजयपालशास्त्री

देवप्रयागस्थ–श्रीरघुनाथकीर्तिपरिसरे व्याकरणविभागीया विशिष्टव्याख्यानमाला २३.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अस्याः विशिष्टव्याख्यानमालायाः व्याख्यान–विषयः आसीत्–"कैयटादिभाष्यव्याख्यातृणाम् उदात्तादिविषयिणी महती भ्रान्तिः" इति। अस्यां विशिष्टव्याख्यानमालायां मुख्यवक्तृत्वेन राष्ट्रियसंस्कृतसंस्थानस्य गरलीपरिसरे साहित्यविभागस्य आचार्यः (साम्प्रतं च पतञ्जलीयोगविद्यापीठे आयुर्वेदपाण्डुलिपिग्रन्थसंग्रहालये आचार्यत्वेन कार्यरतः) प्रो. विजयपालशास्त्रिमहोदयः समुपस्थितोऽभवत्। स्वीये वक्तव्ये आचार्यः विजयपालशास्त्रिमहोदयः शास्त्रसम्मतदिशा महाभाष्ये प्रतिपादिते उदात्तादिविचारे परवर्तिनां कैयटादि–आचार्याणां भ्रान्तिं सन्दर्भपुरस्सरं समुपास्थापयत्। अनेन महोदयेन उक्तं यद्–भाष्यव्याख्याकाराः कैयटः, नागेशः, भट्टोजिदीक्षितः, काशिकारादयः सर्वेऽपि उदात्तादीनामुच्चारणं दुर्विज्ञेयं मन्यन्ते। अत एव स्व–स्वग्रन्थेषु ''ताल्वादिस्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसञ्ज्ञः स्यात्'' इत्यादिरूपेण उदात्तादीन् परिभाषयन्ति। किन्तु उदात्तादीनामुच्चारणं तु पशवोऽपि कुर्वन्ति, अत एव नास्ति उदात्तादीनामुच्चारणं गहनम्। वस्तुतः ''सिद्धं तु समानप्रक्रमवचनात्'' इत्यादिभाष्यवचनानाम् अपव्याख्यानात् एषा समस्या अद्यत्वे समाजे दृश्यते। किन्तु भाष्यादिसम्मतमुदात्तलक्षणमेवं स्यात्–अल्पप्राणमहाप्राणयोः समाने प्रक्रमे सति उच्चैरुच्चार्यमाणोऽजुदात्तसंज्ञको भवति। एवं प्रकारेण विजयपालशास्त्रिमहोदयेन अस्य विषयस्योपरि एकहोरापरिमित्तं विशिष्टव्याख्यानं प्रदत्तम्। तथा अस्य विषयस्योपरि अनेके सन्दर्भाः बहुचातुर्येण प्रस्तुताः। अस्य महोदयस्य उदात्तादिविषयकव्याख्यानं श्रावं श्रावं छात्राः अध्यापकाः शोधार्थिनश्च विगतसन्देहाः अभूवन्। अवसरेऽस्मिन् परिसरस्य समे छात्राः आचार्याः तथा देशस्य विभिन्नस्थानेभ्यः समागताः विद्वांसः शोधछात्राश्च समुपस्थिताः आसन्।




सङ्गोष्ठ्याः उद्घाटनसत्रे अध्यक्षीयं भाषणं कुर्वन् प्रो. के.बी. सुब्बरायुडुः

## साहित्यविभागीया राष्ट्रिया सङ्गोष्ठी

राष्ट्रिय-संस्कृत-संस्थानस्य देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरेण विविध-विभागीयाः राष्ट्रिय-संगोष्ठयः आयोजिताः। अस्मिन् क्रमे २४-२५ जनवरी, २०१७ इत्यवधौ दिनद्वयव्यापिनी साहित्यविभागीया राष्ट्रिया संगोष्ठी समायोजिता। "संस्कृतेऽनूदितं लघुकथासाहित्यम्" इति विषये आयोजितायाम् अस्या संगोष्ठयाम् आहत्य पञ्च सत्राणि सञ्चालितानि। अस्याः संगोष्ठ्याः प्रथमे दिने २४ जनवरी, २०१७ तमे दिनाङ्के अपराह्णे उद्घाटनसत्रं समायोजितम् अभवत्। उद्घाटनसत्रे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः समादरणीयः आचार्यः अभिराजराजेन्द्रमिश्रमहोदयः मुख्यातिथित्वेन समागतः। कार्यक्रमास्यास्य आध्यक्ष्यं विहितम् परिसरप्राचार्येण आचार्येण के.बी.सुब्बरायुडुमहोदयेन। अवसरेऽस्मिन् परिसरस्य व्याकरणविभागाध्यक्षः आचार्यः बनमालीबिश्वालमहोदयोऽपि मञ्चम् अलङ्कृत्योद्बोधितवान्। दीपप्रज्वालनपुरस्सरम् अस्य उद्घाटनसत्रस्य समारम्भो जातः। स्वागतकर्मणः समनन्तरमेव लघुकथानां विषये कृतभूरिश्रमः व्याकरणविभागाध्यक्षः आचार्यः बनमालीबिश्वालमहोदयः वाचिकस्वागतेन सह लघुकथानां विषयेऽपि परिचयं प्रास्तौत्। ततः स्वीये प्रास्ताविके संगोष्ठीसंयोजकः डा. प्रफुल्लगड़पालः संक्षेपेण संस्कृतेऽनूदितलघुकथानां विषये स्वाभिप्रायं प्रास्तौत्। अस्याः संगोष्ठ्याः उद्घाटनसत्रे मुख्यातिथित्वेन समागतः आचार्यः अभिराजराजेन्द्रमिश्रमहोदयः लघुकथायाः ऐतिह्यं विकासं च सविस्तारं वर्णितवान्। ततः सभाध्यक्षेण परिसरप्राचार्येण आचार्येण के.बी.सुब्बरायुडुमहोदयेन सभा सम्बोधिता।



सम्पूर्तिसत्रे सङ्गोष्ठ्याः प्रतिवेदनं प्रस्तुवन् डॉ. प्रफुल्लगडपालः

उद्घाटनसत्रस्य समनन्तरमेव प्रथम-पत्रवाचन-सत्रं प्राचलत्। अस्मिन् सत्रे डा. बी.के. सिहंदेवः निरञ्जन-मिश्रश्च लघुकथाविषये शोधपत्रे प्रस्तुतवन्तौ। अस्यामेव अवधौ सायङ्काले 'राष्ट्रियकविसम्मेलनम्' आयोजितमभवत् यत्र नैके प्रतिष्ठिताः नवीनाश्च कवयः स्वरचिताः नवीनाः कविताः प्रस्तुतवन्तः।

राष्ट्रियसंगोष्ठ्याः अस्मिन् द्वितीये दिने पत्रवाचनसत्रद्वयम् आयोजितम्। तत्र द्वितीयपत्रवाचनसत्रे चत्वारो वाचकाः– डा. मनीषजुगरानः, डा.शैलेन्द्रनारायणकोटियालः, डा. प्रफुल्लगडपालः, डा.सुशीलप्रसादः–चेत्येते संस्कृते अनूदितानां लघुकथानां विषये स्वीयानि शोधपत्राणि प्रास्तुवन्। ततः तृतीयशोधपत्रवाचनसत्रे द्वौ वाचकौ (साक्षात् संस्कृते लघुकथानाम् अनुवादकौ) डॉ. तन्मयकुमारभट्टाचार्य-डॉ. नारायणदाशौ स्वीये प्रभावपूर्णे शोधपत्रे प्रस्तुतवन्तौ।



सम्पूर्तिसत्रस्य किञ्चन दृश्यम्

रा ष्ट्रि या सं गो ष्ठी


## साहित्यविभागीया विशिष्टव्याख्यानमाला



विशिष्टव्याख्यानं प्रस्तुवन् प्रो. अभिराजराजेन्द्रमिश्रः

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे २४ जनवरी, २०१७ तमे दिनाङ्के परिसरस्य साहित्यविभागेन विशिष्टिव्याख्यानमाला-कार्यक्रमः समायोजितः। अस्यां विशिष्टिव्याख्यानमालायां मुख्य-वक्तृत्वेन संस्कृते कृतभूरिश्रमः कविवरश्च आचार्यः अभिराजराजेन्द्रमिश्रः व्याख्यानं प्रादात्। "समकालीनसंस्कृतसाहित्यस्य नवीनाः प्रवृत्तयः" इत्यास्मिन् विषये आचार्येणानेन सुष्ठुतया आधुनिकसंस्कृतसाहित्यस्य नवीनानां प्रवृत्तीनां विषये समुद्बोधितम्। आधुनिकसंस्कृतसाहित्यं प्रमुखतया विधा-छन्द-अंलकार-उपमा-लोकजीवन-राष्ट्रप्रेम-इत्यादिभिः साहित्यतत्त्वैः समेध्यते इति तेन स्वीये व्याख्याने निगदितम्। भारतीयसाहित्यस्य प्रभावः प्राच्यसाहित्ये दृश्यते एव' किन्तु प्राच्यसाहित्यतत्त्वानां प्रभावोऽपि कथ्य-विद्या-बिम्बादिभिः संस्कृते जायमानं वर्तते। अयं च विनिमयः सर्वथा स्वागतेयः इति तस्य अभिमतम्। कविवरस्य मिश्रमहोदयस्य अस्यां व्याख्यानमालायां प्रायेण उपशतं श्रोतारः व्याख्यानं श्रुत्वा ज्ञानसागरे नितरां निमज्जिताः।

## ज्योतिषविभागीया राष्ट्रिया सङ्गोष्ठी



सङ्गोष्ठ्या: उद्घाटनसत्रे विषयप्रवर्तनं कुर्वन् डॉ. सुरेशशर्मा

ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी २७.०१.२०१७ त: २८.०१.२०१७ दिनाङ्कं यावत् समायोजिता। तत्र प्रमुखविषय: आसीत्–"गोलविमर्श:।" अस्यां सङ्गोष्ठ्याम् पञ्च सत्राणि समायोजितानि। सङ्गोष्ठ्याम् २७.०१.२०१७ तमे दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन भोपालपरिसरस्य ज्योतिषविभागस्य आचार्य: प्रो. हंसधरझा समुपस्थित:। सङ्गोष्ठ्या: प्रास्ताविक–भाषणे ज्योतिषविभागस्य सहायकाचार्येण डॉ. सुरेशशर्मणा कथितं यत्–'ज्योतिषशास्त्रमस्ति प्रत्यक्षशास्त्रम्। अत्र प्रत्यक्षविरुद्धानि ऋषिवाक्यान्यपि प्रामाण्यत्वेन नाङ्गीक्रियन्ते। गणितागततथ्यानां प्रत्यक्षरूपेण वेधार्थं गोलज्ञानं नितरामावश्यकम्।' प्रथमसत्रे डॉ. विजेन्द्रकुमारमहोदयस्य सत्राध्यक्षतायां त्रयाणां शोधपत्राणां प्रस्तुतिकरणमभवत् यस्मिन् डॉ. शैलेन्द्रनारायणकोटियालमहोदयेन कक्षाक्रमाणां वारक्रमेण सह सम्बन्धविवेचनं कृतम्। द्वितीयसत्रस्य सत्राध्यक्षत्वं वेदव्यासपरिसरस्य आचार्येण डॉ. पी.बी. सुब्रह्मण्यमहोदयेन निर्व्यूढम्। सत्रेऽस्मिन् चत्वारि शोधपत्राणि उपस्थापितानि। अस्य सत्रस्य प्रमुखाकर्षणं डॉ. विजेन्द्रकुमारशर्ममहोदयेन ३डी माध्यमेनोपस्थापितो विषय: "अक्षक्षेत्राणां प्रायोगिकमहत्त्वम्" इति आसीत्।




उद्घाटनसत्रावसरे प्रो. हंसधरझावर्याय स्मृतिचिह्नं यददन्त: प्राचार्यप्रमुखा: परिसरसदस्या:

तृतीयसत्रस्य आध्यक्ष्यं श्रीबद्रीकेदारवेदवेदांगसंस्कृतमहाविद्यालयस्य आचार्येण डॉ. रामदयालमैदुलीमहोदयेन निर्व्यूढम्। सत्रेऽस्मिन् चत्वारि शोधपत्राणि प्रस्तुतानि आसन्। चतुर्थसत्रस्य सत्राध्यक्ष: उत्तराखण्डसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागाध्यक्ष: डा. रतनलालवर्य: आसीत्।



सङ्गोष्ठ्याम् उद्घाटनभाषणं कुर्वन् प्रो. हंसधरझा:

२८.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे विशिष्टातिथि: पूर्वकैबिनेटमन्त्री उत्तराखण्डस्य क्योङ्कालेश्वरझालीमाली–देवीआश्रमस्य समाजसेवक: मोहनसिंहरावतगाँववासी आसीत्। समापनावसरे मुख्यातिथिमहोदयेनोक्तं यत् 'देवभूमे: उत्तराखण्डस्य ज्योतिषक्षेत्रे विशिष्टं योगदानं वर्तते। अत्र हि मुकुन्दवल्लभदैवज्ञ: तथा चक्रधरजोशीसदृशा: बहव: विद्वांस: अभवन् ये ज्योतिषक्षेत्रे स्वकीयं महत्वपूर्णं योगदानं अददन्, परं तै: प्रतिपादिता: बहव: ग्रन्था: अद्यापि प्रकाशनाधीना: सन्ति:।' ज्योतिषविभागीयसङ्गोष्ठीं दृष्ट्वा प्रतिभाति यदिदानीं कार्यमिदं शीघ्रमेव संपूर्णतां प्राप्स्यति तथा देवप्रयाग: पूर्ववत् ज्योतिषस्य केन्द्रं भविष्यति। द्वयोरपि सत्रयो: आध्यक्ष्यं परिसरप्राचार्य: प्रो. के.बी. सुब्बरायुडुवर्य: निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्य: आहत्य १५ विद्वांस: शोधपत्राणि प्रास्तुवन्। अस्या: सङ्गोष्ठ्या: संयोजकदायित्वं डा. मुकेशकुमार: डॉ. सुरेशशर्मा च आवहताम्। सम्पूर्तिसत्रे बनमाली बिश्वाल: विशिष्टातिथिरूपेणोपस्थित: आसन्।




सम्पूर्तिसत्रे मोहनसिंहरावताय स्मृतिचिह्नं यच्छन्तौ प्रो. के.बी. सुब्बरायुडु:, प्रो. बनमालीबिश्वालश्च

## ज्योतिषविभागीया विशिष्टव्याख्यानमाला




विशिष्टव्याख्यानं कुर्वन् प्रो. हंसधरझा:

ज्योतिष-विभागीया विशिष्ट–व्याख्यानमाला २७.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अत्र व्याख्यानविषय: आसीत्–"व्रतपर्वसु मुहूर्तविमर्श:।" मुख्यवक्तृत्वेन समाहूता: आसन् भोपालपरिसरस्य ज्योतिषविभागस्य–आचार्या: हंसधरझावर्या: विशिष्टव्यानमालाया: अध्यक्षत्वं परिसरस्य प्राचार्येण प्रो. के.बी. सुब्बरायुडुमहोदयेन निर्व्यूढम्। व्याख्यानावसरे प्रो. हंसधरझावर्येण सविस्तरेण प्रतिपादितं यत् व्रतपर्वसु बहुत्र सूर्योदयकालव्यापिन्यास्तिथे महत्त्वं भवति। नास्तीदमावश्यकं यत् सा तिथि आदिनं भवेदथवा उदयादुदयं यावत् भवेत्। तिथे: उदयकाले सत्वात् आदिनं अहोरात्रं वा तस्या: सत्ता भवति। एवमेव क्षयतिथौ अधितिथौ च व्रतपर्वसु कथमाचरणीयमित्येतत् विषयमधिकृत्यापि ज्योतिषग्रन्थानाम्, धर्मशास्त्रीयग्रन्थानां पुराणादिनां च प्रमाणपुरस्सरं विषयस्योपस्थापनम् अनेन कृतम्। अवसरेऽस्मिन् परिसरस्य समस्तछात्रा: आचार्या: तथा देशस्य विभिन्नस्थानेभ्य: समागता: विद्वांस: शोधछात्राश्च समुपस्थिता: आसीत्।

## वेदविभागीया राष्ट्रिया सङ्गोष्ठी




डॉ. सुनीलकात्यायनस्य स्वागतं कुर्वन्तः परिसरसदस्याः

२८-२९.०१.२०१७ तमयोः दिनाङ्कयो राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरेण दिनद्वयव्यापिनी राष्ट्रिया सङ्गोष्ठी समायोजिता। 'वेदेषु राष्ट्रचेतना' इति विषये इयं सङ्गोष्ठी आयोजिता आसीत्। सङ्गोष्ठ्याः उद्घाटनकार्यक्रमः राष्ट्रियसंस्कृतसंस्थानस्य वेदविभागाध्यक्षस्य वेदशास्त्र-निष्णातस्य आचार्यस्य मनोजकुमारमिश्रस्य मुख्यातिथ्ये तथा च काशीहिन्दुविश्वविद्यालयस्य संस्कृत-विद्याधर्मविज्ञानसङ्कायस्य वेदविभागीय-आचार्यस्य डा. सुनीलकात्यायनमहोदयस्य विशिष्टातिथ्ये परिसर-प्राचार्यस्य प्रो.के.बी.सुब्बरायुडुमहोदयस्य आध्यक्ष्ये समपद्यत। उद्घाटनसत्रात् परं समनुष्ठिततयोः प्रथमद्वितीयशोधपत्रवाचनसत्रयोः विभिन्नेभ्यः स्थानेभ्यः विश्वविद्यालयेभ्याश्चागता अष्टौ प्राध्यापकाः शोधच्छात्राश्च-मिथिलेशकुमारः, चन्द्रशेखरभट्टः, डा. अरुणमिश्रः, डा. नारायण-भट्टराई, डा.वाणीविलासः डा.सुनीलकात्यायनः, डा.हरिशङ्करडिमरी प्रभृतयः वेदेषु राष्ट्रचेतना-सम्बद्धानि विविधविषयसंवलितानि शोधपत्राणि प्रास्तुवन्। सत्रमिदं सत्राध्यक्षस्य आचार्यस्य डा. रामप्रसादउपाध्यायमहोदयस्य शोधपत्रप्रस्तुत्या अध्यक्षीयोद्बोधनेन सम्पूर्तिं समध्यगच्छत्।




उद्घानसत्रे बीजभाषणं कुर्वन् प्रो. मनोकुमारमिश्रः

सङ्गोष्ठ्याः द्वितीय-दिवसे तृत्तीयशोधपत्रवाचनसत्रे परिसरस्य शिक्षाशास्त्रस्य प्राध्यापकः डा. मनीषजुगरानः, डा. रामप्रसादउपाध्याय, श्रीमती अनुराधा, डा.नीरजतिवारी, श्रीप्रेमप्रकाशमहोदयादयः स्वीयानि पत्राणि प्रस्तुतवन्तः। सत्रमिदम् परिसरस्य व्याकरणविभागाध्यक्षस्य आचार्यस्य प्रो. बनमालीबिश्वालस्य पत्रप्रस्तुत्या अध्यक्षीयोद्बोधनेन च पूर्णताम् अवाप्नोत्। तदनु समायोजिते चतुर्थपत्रवाचनसत्रे जयपुरपरिसरीयः डा.धर्मेन्द्रपाठकः, श्रीअरूणशर्मा, डा. मनोरथप्रसाद-नौगॉई, डा.निपुणचौधरी, डा.सुशीलप्रसादबडोनी, डा. सुरेशशर्मा, डा.शैलेन्द्रप्रसादउनियालः, डा.शैलेन्द्रनारायणकोटियालप्रभृतयः शोधपत्राणि प्रास्तुवन्। सत्रेऽस्मिन् आध्यक्ष्यं काशीहिन्दुविद्यालयस्य वेदप्राध्यापकेन डा.सुनीलकात्यायनेन निर्व्यूढम्। आहत्य संगोष्ठयाम् अस्यां राजस्थान-उत्तरप्रदेश-दिल्ली-उत्तराखण्ड हिमाचलप्रदेशानाम् च २२ विद्वांसः शोधपत्राणि प्रास्तुवन्। "वेदेषु राष्ट्रचेतना" इति विषयं समवलम्ब्य प्रवर्तितायाः द्विदिवसीयवेदविभागीय-राष्ट्रिय संङ्गोष्ठ्याः सम्पूर्तिसमारोहे सङ्गोष्ठ्याः संयोजकेन डॉ.शैलेन्द्रप्रसादउनियालेन प्रतिवेदनं निम्नश्लोकैः विहितम्–

**शिक्षा स्वास्थ्यं निवासश्च सदुद्योगस्तथैव च। मनसो जनं चापि धर्मो ब्रह्मात्मनस्तथा।।**
**पञ्चस्वेवाप्तनैपुण्यो प्राप्यात्मानं भजेन्नरः। सफलं जीवनं तस्य वेदैर्वेद्यं हृदा लभेत्।।**
**समाजे व्याप्तदूषणमपनेतुं विषया इमे। विशेषेण प्रदत्तपात्रसत्पात्ररचनाय च।।**
**सभ्यो नागरिको भूयात् राष्ट्रकल्याणकृत्तथा। कर्त्तव्यपालकाश्चैव जनसौख्यकरा जनाः।।**
**योग्याश्च जागरूकाश्च सर्वेषां हितपालकाः। यथा कालप्रवाहेण नदीजनगृहादिषु।**
**मालिन्यं जायते तत्र शोधनं सुखदायकम्।। तथाप्यत्र समाजेषु विचारैः विमलैः शुभैः।**
**प्रक्षालयन्तु सङ्गोष्ठ्यां जनान् नागरिकान्बुधाः।।**
**आर्यावर्त्तो हि विश्वस्मिन् विश्वेषां राष्ट्रनायकः। रघुनाथस्य कीर्तिश्च प्रसरेद् भुवि मङ्गला।।**

## वेदविभागीया विशिष्टव्याख्यानमाला



विशिष्टव्याख्यानं प्रस्तुवन् प्रो. मनोजकुमारमिश्रः

२८.०१.२०१७ तमे दिनाङ्के 'वैदिकविज्ञानप्रकृतिः' इति विषयमधिकृत्य आयोजितायाः वेदविभागीय-विशिष्टव्याख्यानमालायाः अङ्गतया राष्ट्रियसंस्कृतसंस्थानस्य वेदविभागाध्यक्षस्य आचार्यस्य प्रो.मनोजकुमारमिश्रस्य विशिष्टं व्याख्यानं प्रवृत्तम्। तत्र विशिष्टव्याख्याने मिश्रवर्येण उक्तं यत् वेदमन्त्रैः पञ्चभूतान्यपि पवित्राणि भवन्ति तथा च वेदमन्त्रैः जनानामपूर्वमपि निर्मीयते। अत एव वेदविद्या लोकद्वयसाधिनी च वर्तते। यया इहलोकपरलोकयोः सौख्यमवाप्यते। अन्ते च महोदयेन उक्तं यत् अद्यत्वे जनाः वेदेषु एव सर्वमन्वेषयन्ति यथा एकेन जनेन सुनामी इति श्रुत्वा 'वेदेषु सुनामी' इत्याकारकः निबन्धः रचितः। तन्न समीचीनम् अस्ति अपितु कुत्रचित् स्थलेषु हास्यास्पदं दृश्यते। अवसरेऽस्मिन् परिसरस्य सर्वे छात्राः आचार्याः तथा देशस्य विभिन्नस्थानेभ्यः समागताः विद्वांसः शोधच्छात्राश्च समुपस्थिताः आसन्।

## आधुनिकविभागीया राष्ट्रिया सङ्गोष्ठी



उद्घाटनसत्रे प्रो. कुसुमडोभालमहोदयाया: स्वागतं कुर्वन्त: परिसरसदस्या:

परिसरे जनवरीमासस्य २९-३० दिनाङ्कयो: **'आधुनिकविषयाणां संस्कृतेन सह अन्त:सम्बन्ध:'** इति विषयमधिकृत्य दिनद्वयव्यापिनी आधुनिकविभागीया राष्ट्रिया सङ्गोष्ठी समपद्यत। सङ्गोष्ठ्या: उद्घाटनकार्यक्रमे मुख्यातिथित्वेन हेमवतीनन्दनबहुगुणा-गढवाल-केन्द्रीय-विश्वविद्यालयस्य हिन्दीविभागाध्यक्षा प्रो.कुसुमडोभालवर्या समुपस्थिता आसीत्। विशिष्टातिथित्वेन डी.ए.बी महाविद्यालयस्य सहाचार्या डा.राखी-उपाध्यायवर्या सङ्गोष्ठीं समुद्बोधितवती। आध्यक्ष्यञ्च परिसरप्राचार्येण प्रो.के.बी.सुब्बरायुडुवर्येण निर्व्यूढम्। सङ्गोष्ठ्यां प्रथमशोधपत्रवाचनसत्रस्य आध्यक्षं प्रो. के.बी. सुब्बरायुडुमहोदयेन विहितं तथा चात्र मुख्यातिथि: डॉ. अरविन्दसिंहगौर: आसीत्। अस्य सत्रस्य सञ्चालनं श्रीश्रीओमशर्मा अकरोत्। सत्रेऽस्मिन् हिन्दी-इतिहास-ऑग्लभाषा-कम्प्यूटर संस्कृतसम्बधीनि सप्त शोधपत्राणि विविधप्रदेशात् समागतै: शोधच्छात्रै: अध्यापकैश्च गभीरतया प्रस्तुतानि। सङ्गोष्ठ्या: द्वितीयशोधपत्रवाचनसत्रे आध्यक्ष्यं प्रो. के.बी. सुब्बरायुडुमहोदयेन विहितं तथा चात्र मुख्यातिथि: डॉ. मुकेशशर्मा तथा विशिष्टातिथि: डॉ. वीरेन्द्रसिंहबर्त्वाल आसीत्। अस्य सत्रस्य सञ्चालनं श्रीपंकजकोटियाल: अकरोत्। सत्रेऽस्मिन् हिन्दी-इतिहास-ऑग्लभाषा-कम्प्यूटरसंस्कृतसम्बधीनि अष्टादशशोधपत्राणि विविधप्रदेशेभ्य: समागतै: शोधच्छात्रै: अध्यापकैश्च गभीरतया प्रस्तुतानि। सङ्गोष्ठ्या: तृतीयशोधपत्रवाचनसत्रे आध्यक्ष्यं प्रो. के.बी. सुब्बरायुडुमहोदयेन विहितं तथा चात्र मुख्यातिथि: डॉ. राखी उपाध्याय: आसीत्। अस्य सत्रस्य सञ्चालनं डॉ. शैलेन्द्रउनियाल: अकरोत्। सत्रेऽस्मिन् हिन्दी-इतिहास-ऑग्लभाषा-कम्प्यूटर-संस्कृतसम्बधीनि द्वाविंशतिशोधपत्राणि विविधप्रदेशात् समागतै: शोधच्छात्रै: अध्यापकैश्च गभीरतया प्रस्तुतानि। सङ्गोष्ठ्या: चतुर्थशोधपत्रवाचनसत्रे आध्यक्ष्यं प्रो. के.बी. सुब्बारायुडुमहोदयेन विहितं तथा चात्र मुख्यातिथि: डॉ.निपुणचौधरी आसीत्। अस्य सत्रस्य सञ्चालनं डॉ. मुकेशशर्मा अकरोत्। सत्रेऽस्मिन् हिन्दी-इतिहास-ऑग्लभाषा-कम्प्यूटर-संस्कृतसम्बधीनि अष्टादश शोधपत्राणि विविधप्रदेशेभ्य: समागतै: शोधच्छात्रै: अध्यापकैश्च गभीरतया प्रस्तुतानि। सङ्गोष्ठ्या: पञ्चमशोधपत्रवाचनसत्रे आध्यक्ष्यं प्रो. के.बी. सुब्बरायुडुमहोदयेन विहितं तथा चात्र मुख्यातिथि: श्री संदीपरावत: आसीत्। अस्य सत्रस्य सञ्चालनं डॉ. सुरेशशर्मा अकरोत्। सत्रेऽस्मिन् हिन्दी-इतिहास-ऑग्लभाषा-कम्प्यूटर-संस्कृतसम्बधीनि त्रिंशच्छोधपत्राणि विविध-स्थानेभ्य: समागतै: शोधच्छात्रै: अध्यापकैश्च गभीरतया प्रस्तुतानि। संस्कृतभाषाया आधुनिकं स्वरूपमिति विषयमधिकृत्य पावरपाएंट-माध्यमेन प्रो. बनमाली बिश्वालेन स्वकीयं शोधपत्रं प्रस्तुतम्।

सङ्गोष्ठ्या: समारोपसत्रे मुख्यतिथित्वेन गढवालकेन्द्रीयविश्वविद्यालयस्य ऑङ्ग्लविभागाध्यक्ष: प्रो. डी.आर.पुरोहित: सभां समबोधयत्। विशिष्टातिथित्वेन हरिद्वारस्थ-देवसंस्कृतिविश्वविद्यालयस्य पत्रकारिता-जनसञ्चार-विभागस्य अध्यक्ष: प्रो.सुखनन्दनसिंह: अध्यक्षत्वेन परिसरप्राचार्य: प्रो.के.बी.सुब्बरायुडुमहोदयश्च समुपस्थितौ आस्ताम्। सङ्गोष्ठ्यां संगणक-शारीरिक-इतिहास-हिन्दी-ऑग्ल-इत्यादिविषयाणां संस्कृतेन सह अन्त:सम्बन्ध इति विषये ६५ शोधच्छात्रा: प्राध्यापकाश्च शोधपत्राणि प्रास्तुवन्। धन्यवादज्ञापनं सङ्गोष्ठीसंयोजकेन इतिहासविषयस्य प्राध्यापकेन डा.अरविन्दगौरवर्येण विहितम्। अस्य सम्पूर्तिसत्रस्य सञ्चालनं डॉ. मनीषजुगरानमहोदयेन कृतम् ।

राष्ट्रिया संगोष्ठी

## आधुनिकविभागीया विशिष्टव्याख्यानमाला




विशिष्टं व्याख्यानं प्रयच्छन् डॉ. अजयपरमार:

आधुनिकविभागीया विशिष्टव्याख्यानमाला २९.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अस्या: व्याख्यानविषय:-"ऐतिहासिक स्रोत के रूप में संस्कृत साहित्य" इति आसीत्। मुख्यवक्ता-डा. अजयपरमार: (विभागाध्यक्ष: इतिहास-संस्कृति-पुरातत्त्वविभाग:, उत्तराखण्ड-संस्कृतविश्वविद्यालय:, हरिद्वारम्) इति आसीत्। अस्यां विशिष्टव्याख्यानमालायां महोदयेन उक्तं यत् संस्कृतभाषा न केवला आध्यात्मिकक्रियाकलापानां भाषा अस्ति, अपितु इतिहासविषयस्यापि अनन्तसामग्री संस्कृतभाषायामेव अस्ति। संस्कृतभाषां विना कोऽपि इतिहासकार: पूर्णतां न प्राप्नोति, यतोहि संस्कृतभाषा पुराकाले भारतस्य जनभाषा आसीत्। अपि च संस्कृतभाषा सर्वासां भाषाणां उर्वरकभूमि: अस्ति। अनया संस्कृतभाषयैव विश्वस्य समस्तभाषासमूह: सम्पोषित: आसीत्। अत एव संस्कृतभाषा समस्तभाषाणां जन्मदात्री कथ्यते। अन्ते महोदयेन संस्कृतभाषायां निबद्धानाम् अनेकग्रन्थानां इतिहासपरिशुद्धिसन्दर्भे सन्दिग्धता प्रकटिता। अवसरेऽस्मिन् परिसरस्य समस्तछात्रा: आचार्या: तथा देशस्य विभिन्नस्थानेभ्य: समागता: विद्वांस: शोधच्छात्राश्च समुपस्थिता: आसन्।




सङ्गोष्ठ्यां शोधपत्रं प्रस्तुवन् डॉ. गणेश्वरझा:

## न्यायविभागीया राष्ट्रिया सङ्गोष्ठी

परिसरे न्यायविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी ३०.०१.२०१७ तः ३१.०१.२०१७ दिनाङ्कं यावत् सम्पन्ना। तत्र च मुख्यो विषयः आसीत्–"न्यायशास्त्रस्य शास्त्रन्तरेषु प्रभावः।" अस्यां सङ्गोष्ठ्यां चत्वारि सत्राणि समायोजितानि। अस्यां सङ्गोष्ठ्याम् ३०-०१-२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्तदीक्षितः समुपस्थितः। ३१-०१-२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथिः रा.सं.सं. गरलीपरिसरस्य साहित्याचार्यः (इदानीं पतञ्जलियोगविद्यापीठे आयुर्वेदपाण्डुलिपिग्रन्थसंग्रहालये कार्यरतः) प्रो. विजयपालशास्त्री आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य १५ विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं परिसरन्यायविभागाध्यक्षः डा. आर्. बालमुरुगन् आवहत्। दिनद्वये समायोजितेषु चतुर्षु सत्रेषु नानाप्रान्तेभ्यः समागताः विद्वन्मणयः द्वादशसंख्याकाः हृद्यान् विचारान् समुपास्थापयन्।


## न्यायविभागीया विशिष्टव्याख्यानमाला




विशिष्टव्याख्यानं प्रस्तुवन् प्रो. पीयूषकान्तदीक्षितः

परिसरे न्यायविभागीया विशिष्टव्याख्यानमाला ३०.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अस्याः व्याख्यान-विषयः–"न्यायशास्त्रे प्रमाणविचारः" इति आसीत्। अत्र मुख्यवक्ता-प्रो. पीयूषकान्तदीक्षितः (कुलपतिः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्) आसीत्। दीक्षितमहोदयेन न्यायसूत्रसम्मतं प्रमाणसामान्यलक्षणं प्रतिपाद्य प्रत्यक्षादिभेदेन चतुर्विधानां प्रमाणानां लक्षणानि छात्राणामवबोधनमनुसृत्य अतिसरलया शैल्या उपस्थापितानि। तस्य व्याख्यानेऽयं विशेषः सर्वैः श्रोतृभिरधिगतः वर्तते यत् महोदयेन अतिगभीरः प्रमाणविषयः प्राच्यनव्यक्रमेण षडिन्द्रियाणां चक्षुस्त्वग्घ्राणरसनश्रोतमनसामेव प्रत्यक्षप्रमाणत्वं न्यायशास्त्रसम्मतं वर्तते इति सुष्ठु व्यवस्थापितम्। एवमनेन प्रकारेण लोके सर्वेषामेव अनुमित्यनुभवः प्रतिदिनं जायते शास्त्रेण तस्य कारणक्रमः प्रतिपाद्यते येन लोकः स्वयमेव परीक्षितुं प्रभवति, यत् स्वीयानुमितिः यथार्था वा न वा? यथार्थानुमितिः कथं सम्पादनीया? इत्यादिविचाराः सन्दर्भेऽस्मिन् विशिष्टव्याख्यात्रा छात्रेभ्यः बोधिताः आसन्। एवं सादृश्यज्ञानम् एव तृतीयं प्रमाणम् उपमानं भवति अस्य प्रमाणस्य प्रयोजनं पदशक्तिज्ञानं भवति तथा गोसदृशः गवयः भवतीति ज्ञात्वा गवयम् अजानन् पुरुषः गोसदृशं दृष्ट्वा अयमेव गवयपदवाच्यः इति प्रतिमिनोति इत्यपि महोदयेन प्रतिपादितम्। एवं शब्देनार्थज्ञानोत्तरं ज्ञातार्थानां परस्परान्यावगहिबोधः शाब्दबोधः इत्युच्यते स एव शब्दप्रमाणस्य फलम्। शास्त्रान्तरसम्मत-अर्थापत्तिप्रमाणादिकं यथायोग्यमनुमानादौ अन्तर्भवति इत्यपि महोदयः बोधितवान्। अवसरेऽस्मिन् परिसरस्य समस्तच्छात्राः आचार्याः तथा देशस्य विभिन्नस्थानात् समागताः विद्वांसः शोधच्छात्राश्च समुपस्थिताः आसन्।

## ग्रन्थलोकार्पण-कार्यक्रमः सम्पन्नः



'पालिवण्णमाला' इति ग्रन्थस्य लोकार्पणदृश्यम्

राष्ट्रिसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे २५ जनवरी, २०१७ तमे दिनाङ्के साहित्यविभागस्य राष्ट्रिय-सङ्गोष्ठ्याः उद्घाटनावसरे डा. प्रफुल्लगडपालविरचितौ द्वौ ग्रन्थौ 'पालिवण्णमाला' (Alphabets of Pali) 'पालि-चित्तपद-मालिका' (Pictorial Glossary of Pali) इत्येतौ लोकायार्पितौ। एतच्च ग्रन्थद्वयं पालिभाषायाः शिक्षणाय उद्दिष्टौ। ग्रन्थलोकार्पणावसरेऽस्मिन् संस्कृतजगतः प्रसिद्धो विद्वान् कविराजश्च प्रो. अभिराज-राजेन्द्रमिश्रः, श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुः, कोलकातास्थ-कोलकाता-संस्कृत-महाविद्यालय-विश्वविद्यालयस्य प्राच्यविद्या-विभागाध्यक्षः तन्मयकुमारभट्टाचार्यः, श्रीरघुनाथ-कीर्तिपरिसरस्य व्याकरणविभागाध्यक्षः प्रो. बनमाली बिश्वालः च मञ्चे समुपस्थिताः आसन्। प्रसङ्गेऽस्मिन् मुख्यातिथिना प्रो. अभिराजराजेन्द्र-मिश्रमहोदयेन पालि-संस्कृतयोः अन्तःसम्बन्धविषये सम्राजोऽशोकस्य लोककल्याणकारिणो राज्यस्य च विषये स्वीयव्याख्याने चर्चा विहिता। अवसरेऽस्मिन् 'तेन पालिभाषायाः प्रचारप्रसार-अध्ययन-अध्यापन-अनुसन्धानादीनां आवश्यकता वर्तते' इति आशयः प्रकटितः। 'राष्ट्रियसंस्कृतसंस्थानमपि पालिभाषायाः विकासे स्वीयां महतीं भूमिकां निर्वक्ष्यति' इति आशा प्रकटिता। तेन विश्वासश्च प्रकटितः यत् पालि-शिक्षणे इमौ ग्रन्थौ अवश्यं लोकोपयोगित्वं भजिष्येते इति।



'पालिचित्तपदमाला' इति ग्रन्थस्य लोकार्पणदृश्यम्




कविसम्मेलने काव्यं प्रस्तुवन् डॉ. नारायणदासः

## अखिलभारतीयकविसम्मेलनं सम्पन्नम्

२४.०१.२०१७ दिनाङ्के परिसरे **''अखिलभारतीयकविसम्मेलनम्''** आयोजितम्। कविसम्मेलनेऽस्मिन् संस्कृतक्षेत्रे प्रसिद्धाः कवयः प्रो. अभिराजराजेन्द्रमिश्रः, डा. श्रेयांसद्विवेदी, डा. ब्रजेन्द्रकुमारसिंहदेवः, डा. निरञ्जनमिश्रः, प्रो. बनमालीबिश्वालः, डा. नारायणदाशः, डा. तन्मयभट्टाचार्यः, डा. प्रफुल्लगडपालः, डा. मनीषजुगरानः, डा. शैलेन्द्रनारायणकोटियालः, डा. मुकेशशर्मा, डा. बीरेन्द्रबर्त्वालः इत्यादयो विद्वांसः काव्यपाठमकुर्वन्। अत्र अभिराज- राजेन्द्रमिश्रवर्यस्य ''रौति कोकिलाः'' रुचिरपदा विलसति गौरी.......'' साधुतामाचरेयुः भुजङ्गाः कथम्? तथा च गङ्गास्तवनसम्बन्धिन्यः चतस्रः कविताः मनोहारिण्यः आसन्। तथा च भुजङ्गप्रयातछन्दसः परिसरीयकवेः डॉ. मनीषजुगरानमहोदयस्य ''चन्द्रो विशिष्टः'' इति कविता तथा च गढवालीभाषायां निबद्धा डॉ. बीरेन्द्रबर्त्वालमहोदयस्य कविता अतीव मार्धुयमयी आसीत्। सर्वेषामपि कवीनां कवितापाठेन देवप्रयागस्य सर्वेऽपि जनाः मुग्धाः जाताः। कार्यक्रमस्यास्य संयोजनं साहित्यविभागाध्यक्षेण डॉ. प्रफुल्लगडपालेन विहितम्। कविसम्मेलनस्य सञ्चालनं डॉ. नारायणदाशेन कृतं तथा आध्यक्ष्यं च परिसरप्राचार्येण निर्व्युढम्।

## गणतन्त्रदिवसोत्सवः


गणतन्त्रदिवसावसरे उद्बोधयन् परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः

२६.०१.२०१७ दिनाङ्के परिसरे गणतन्त्रदिवसो महता हर्षोल्लासेन अनुष्ठितः। तद्दिने प्रातः ९:०० वादने राष्ट्रियसंस्कृतसंस्थानान्तर्गतस्य रघुनाथकीर्तिपरिसरस्य प्राङ्गणे सर्वे छात्राः अध्यापकाः कर्मचारिणः परिसर-प्राचार्यश्च उपस्थिताः अभवन्। कार्यक्रमेऽस्मिन् ध्वजारोहणं परिसरप्रमुखेन प्रो. के. बी. सुब्बरायुडुमहोदयेन कृतम्। अनन्तरं राष्ट्रगानं समारब्धम्। राष्ट्रगानस्य अनन्तरं प्राचार्यमहोदयेन गणतन्त्रदिवसविषये बहुसम्यक् ज्ञानवर्धकम् उद्बोधनं प्रदत्तम्। एतदङ्गतया गणतन्त्रदिवसोपलक्ष्ये अनुरुद्ध-गङ्गाशरण-प्राचीनौटियाल-श्यामदेव-अनन्त-नवीन-मनीषप्रभृतिभिः-परिसरच्छात्रैः गीत-नाटक-भाषण-नृत्यानि प्रस्तुतानि। अस्य कार्यक्रमस्य संयोजनं विहितं व्याकरणविभागे अध्यापकेन श्रीश्रीओमशर्मणा। प्रो. बनमाली बिश्वाल राष्ट्रभक्तिपरा स्वीया कविता प्रस्तुता–तदा राष्ट्रप्रीतिः प्रवहति नवीना मन मे।



वार्षिकोत्सवकार्यक्रमे भाषमाणः प्रो. बनमालीबिश्वालः

## वार्षिकोत्सवः समनुष्ठितः


२१.०३.२०१७ दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य वार्षिकोत्सवः सम्पन्नः। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन केन्द्रीयलोकनिर्माणविभागस्य मुख्याभियन्ता श्री एस.सी. भारद्वाजः, विशिष्टातिथित्वेन केन्द्रीयलोकनिर्माणविभागस्य अधीक्षण-अभियन्ता श्री आर.पी. यादवः, सारस्वतातिथित्वेन सरस्वतीविद्यामन्दिरस्य प्रधानाचार्यः श्रीविक्रमसिंहचौहानः च समुपस्थिताः। अस्मिन् कार्यक्रमे आध्यक्ष्यं विहितं परिसरप्राचार्येण प्रो. के.बी. सुब्बरायुडुवर्येण। वार्षिकोत्सवस्य अङ्गतया परिसरे आयोजितासु विविध-शैक्षिक-सांस्कृतिक-शारीरिकस्पर्धासु प्राप्तस्थानाः छात्राः पुरस्कृताः अभवन्। वार्षिकप्रतिवेदनं प्रो. बनमाली बिश्वालेन तथा धन्यवादज्ञापनञ्च डॉ. आर्. बालमुरुगेन कृतम्।

## रघुनाथवार्तावल्याः लोकार्पणम्


श्रीरघुनाथकीर्तिपरिसरेण त्रैमासिकवार्त्तापत्रिका 'रघुनाथवार्तावली' इत्याख्या परिसरस्य वार्षिकोत्सवावसरे २१ मार्च, २०१७ तमे दिनाङ्के परिसरप्राचार्येण समुपस्थितैः अतिथिभिश्च लोकाय अर्पिता। पत्रिकेयं परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य संरक्षकत्वे, प्रो. बनमालीबिश्वाल-डा. प्रफुल्लगडपालयोः मार्गदर्शने प्रकाश्यते। पत्रिकायाः अस्याः सम्पादकाः वर्तन्ते–डा. शैलेन्द्रनारायणकोटियालः, डा. मनीषजुगरानः, श्रीश्रीओमशर्मा च। अस्यां नूतनायां पत्रिकायां परिसरस्य सर्वेऽपि प्रमुखा क्रियाकलापाः प्राकाश्यं गताः।


रघुनाथवार्तावल्याः लोकार्पणस्य किञ्चन दृश्यम्

## शैक्षिकभवन-क्रीडाङ्गणयोः शिलान्यास-समारोहः सम्पन्नः



कार्यक्रमस्थलं समागच्छन्
म.म. राज्यपालः डॉ. कृष्णकान्तपॉलः



शिलान्याससमारोहस्य किञ्चन दृश्यम्

०६.०५.२०१७ तमे दिनाङ्के शनिवासरे शिलान्याससमारोहकार्यक्रमः उत्तराखण्डस्य महामहिमशालिनो राज्यपालस्य डॉ. कृष्णकान्तपॉल-महोदयस्य करकमलाभ्यां, राष्ट्रियसंस्कृत-संस्थानस्य कुलपतेः प्रो. पी.एन. शास्त्रिणः श्रीरघुनाथकीर्तिपरिसर-प्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य सन्निधाने सम्पन्नोऽभवत्। अस्य कार्यक्रमस्य प्रारम्भः महामहिमराज्यपालस्य आगमनानन्तरं सामूहिकराष्ट्रगानेन अभवत्।

राष्ट्रगानानन्तरं परिसरच्छात्राः राष्ट्रियसंस्कृतसंस्थानस्य कुलगीतं 'हिमगिरिवदनम्' इति प्रास्तुवन्। ततश्च दीपप्रज्वालनपूर्वकं वैदिकमङ्गलाचरणं हैदराबादस्थ-सान्दीपनीवेदविद्यालयस्य वैदिकवटुभिः विहितम्। अतिथीनां कृते हिन्दीभाषायां स्वागतगीतं 'गुरुकृपाजागरणमञ्च' इति संस्थायाः स्थानीयैः कलाकारैः प्रस्तुतं तथा च संस्कृतभाषायां स्वागतगीतं रघुनाथकीर्तिपरिसरस्य छात्रैः विहितम्। स्वागताभिनन्दनसत्रेऽस्मिन् अतिथीनां वाचिकस्वागतं परिसरप्राचार्येण तथा च प्रस्तावनापूर्वकं पुष्पगुच्छ-राङ्कवस्मृतिचिह्नादीनां स्वागतिकवस्तूनां प्रदानं परिसरप्राचार्य-कुलपतिभ्यां कृतम्। अतिथीनां परिचयः प्राचार्येण कारितः।

मञ्चासीनाः अतिथयः एवमासन्-(१) महामहिमो राज्यपालः डॉ. कृष्णकान्तपॉलः (उत्तराखण्डः), (२) विनोदकण्डारी (विधायकः, देवप्रयागविधानसभाक्षेत्रम्), (३) श्रीमुकेशकोली (विधायकः, पौडी-गढवालविधानसभाक्षेत्रम्), (४) श्री एस.सी. भारद्वाजः (मुख्याभियन्ता, केन्द्रीयलोकनिर्माणविभागः) इत्यादयः।

स्वकीयोद्बोधने महामहिमराज्यपालेन उक्तं यत्-'संस्कृतभाषया सार्धं हिन्दीभाषायाः प्रयोगोऽपि अनुवादार्थं करणीयः, येन हि सामान्यजनानाम् अपि आकर्षणं संस्कृतं प्रति भवेत्। संस्कृतभाषाविषये तस्याः संवर्धनविषये च संविधानेऽपि बहूतमतया प्रावधानानि कृतानि वर्तन्ते।' ततश्च उभावपि विधायकौ स्वक्षेत्रे संस्कृतस्य विश्वविद्यालयं दृष्ट्वा नितरां मोदमन्तौ अभवताम्, संस्कृतस्य समुन्नत्यर्थं बहुप्रकारैश्च जनान् तोषितवन्तः। केन्द्रीयलोकनिर्माणविभागस्य मुख्य-अभियन्ता श्री एस.सी. भारद्वाजमहोदयः निर्माणाधीनस्य सम्पूर्णस्यापि श्रीरघुनाथकीर्तिपरिसरस्य मानचित्रं प्रस्तरपटले प्रकटय्य तस्य निर्माणस्य कृतेऽपि द्विसम्वत्सरस्यावधिमददत। अस्य कार्यक्रमस्य सञ्चालनं व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिस्वालमहोदयेन कृतम्, अपि च धन्यवादज्ञापनं न्यायविभागाध्यक्षेण डॉ. आर. बालमुरुगमहोदयेन कृतम्।

अस्मिन्नवसरे देवप्रयागस्य इतरेषां महाविद्यालयानामपि अन्यूनाः पञ्चशतं छात्राः अभिभावकाश्चोपस्थिता आसन्। कार्यक्रमोऽयं परिसरीयशिक्षकाणां डा. प्रफुल्लगडपाल-डा. शैलेन्द्रनारायणकोटियाल-डा. सुशीलप्रसादबडोनी-डा. वीरेन्द्रबर्त्वाल-डा. अरविन्दगौर-डा. मुकेशशर्म-डा. मनीषजुगरान-डा. शैलेन्द्रप्रसादउनियाल-डॉ. निपुणचौधरी-डॉ. सुरेशशर्म-श्री पंकजकौटियाल-श्रीसन्दीपसिंहरावत-श्रीश्रीओमशर्मा-श्रीमतीपल्लवीकोटियाल-इत्येतेषां तथा परिसरीयकर्मचारिणां श्रीभगवानदास-अनूप-द्वारिका-पङ्कज-नवीन-ओमप्रकाशादीनां सहयोगेन सुसम्पन्नः।




कार्यक्रमे भाषमाणः संस्थानकुलपतिः प्रो. पी.एन्. शास्त्री



कार्यक्रमे समुपस्थितः श्रोतृवर्गः

## वार्षिकक्रीडास्पर्धाः शैक्षणिकस्पर्धाश्च सम्पन्नाः

परिसरस्य वार्षिकक्रीडास्पर्धा १५-०३-२०१७ - १६-०३-२०१७ दिनाङ्कयोः श्रीचक्रधरजोशीमहाविद्यालये सम्पन्ना तथा च बैडमिन्टनस्पर्धा N.H.P.C. इत्यत्र सञ्जाता। शैक्षिकस्पर्धा परिसरे १६-०३-२०१७ तः १८-०३-२०१७ पर्यन्तं समायोजिताः। स्पर्धासु विजेतृणां परिणामाः अधः प्रस्तूयन्ते-



क्रीडास्पर्धावसरस्य समूहचित्रम्

### शैक्षिकसांस्कृतिकशारीरिक-स्पर्धासु विजेतारः

#### शैक्षिकसांस्कृतिकस्पर्धायां विजेतारः छात्राः

**एककसंस्कृतगीतम्**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| अनुरुद्धत्रिपाठी | गङ्गाशरणः | नवीनकैरवानः |

**संस्कृतभाषणम्**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| प्राचीनौटियालः | श्यामदेवः | गङ्गाशरणः |

**हिन्दीभाषणम्**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| भुवनेशभट्टः | मनीषगौडः | गङ्गाशरणः |

**सुभाषितकण्ठपाठः**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| अनुरुद्धत्रिपाठी | प्राचीनौटियालः | श्यामदेवः |

**संस्कृतनिबन्धलेखनम्**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| प्राचीनौटियालः | अभिलाषः | श्यामदेवः |

**स्फूर्तिस्पर्धा**

| प्रथमम् | द्वितीयम् | तृतीयम् |
|---|---|---|
| गङ्गाशरणः | अनुरुद्धत्रिपाठी | मनीषनौटियालः |

**सामूहिकनृत्यम्**

प्रथमम् - दुर्गेश-भुवनेशभट्टौ (शिवाजीगणः)

**समूहगानम्**

प्रथमम् - गङ्गाशरणः, अतुलध्यानी, नवीनकैरवानः, कमलकिशोरः, शुभमभूरः, मनीषपन्तः (सुभाषगणः)



बैडमिण्टनक्रीडां क्रीडन्तौ क्रीडालू

#### शारीरिकक्रीडास्पर्धायां विजेतारः छात्राः

**१. १०० मी. धावनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| प्रदीपशर्मा | वेदप्रकाशभट्टः | शुभम् डोबरियालः |

**२. २०० मी. धावनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| भास्करविजल्वाणः | मनीषपन्तः | प्रदीपशर्मा |

**३. ४०० मी. धावनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| प्रदीपशर्मा | अनुरुद्धत्रिपाठी | कमलकिशोरः |

**४. ८०० मी. धावनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| मनीषपन्तः | अभिलाषकुकरेती | राहुलकोठारी |

**५. १५०० मी. धावनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| मनीषपन्तः | अनुरुद्धत्रिपाठी | अभिलाषकुकरेती |

**६. उच्चकूर्दनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| भास्करविजल्वाणः | रोहितः | वेदप्रकाशभट्टः |

**७. दीर्घकूर्दनम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| भास्करविजल्वाणः | प्रदीपशर्मा | प्रियंकपंचभैया |

**८. गोलक्षेपणम्**

| प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|
| शुभम्डोबरियालः | अनुरुद्धत्रिपाठी | आयुषतिवारी |


**९. हस्तकन्दुकम्**

विजेता-शिवाजीगणः

**१०. बैडमिन्टन**


विजेता-सुभाषगणः

# अन्ताराष्ट्रिययोगदिवसः समाचरितः



योगं कुर्वन्तः प्राचार्यप्रमुखाः योगविदः

२१.०६.२०१७ तमे दिनाङ्के बुधवासरे अलकनन्दाभागीरथ्योः पवित्रे सङ्गमे तटे परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य पावनसन्निधौ देवप्रयागस्य नगरपञ्चायताध्यक्षायाः श्रीमत्याः कोटियालशुभाङ्ग्याः सन्नियोगे अयं योगदिवसकार्यक्रमः परिसरशिक्षकाणां डा. प्रफुल्लगडपाल-डॉ. शैलेन्द्रप्रसादउनियाल-श्रीश्रीओमशर्मा इत्यादीनां गरिमामय्यामुपस्थित्यां समारब्धः। अस्मिन् कार्यक्रमे स्थानीयाः नागरिका अपि सोत्साहेन भागं गृहीतवन्तः। कार्यक्रमे प्राचार्यमहोदयेन पद्मासन-चक्रासन-हलासन-सर्वाङ्गासन-ताडासनादीनि विभिन्नासनानि कारितानि। तथा चान्ते-



योगं कुर्वन्तः परिसरसदस्याः अन्ये च


**योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।**

इति श्लोकेन योगस्य महत्त्वविषयं किञ्चिदुपदिश्य प्रतिज्ञां कारितवान्। अनन्तरं च सङ्गमे स्नानं कृत्वा सन्ध्यावन्दनञ्च विधाय योगकार्यक्रमः सुसम्पन्नोऽभवत्।

# कौमुदीमहोत्सवे भागग्रहणम्

राष्ट्रियसंस्कृतसंस्थानेन नवदेहल्यां केन्द्रीयविद्यालयस्य सर्वपल्लीराधाकृष्णनसभागारे चतुर्दशः नाट्यमहोत्सवः समायोजितः, यत्र राष्ट्रियसंस्कृतसंस्थानस्य आहत्य द्वादशपरिसराः पूर्वनिश्चितरूपकाणां प्रस्तुत्या समेषामपि दर्शकानां मनांसि आह्लादयन्। देवप्रयागस्य श्रीरघुनाथकीर्तिपरिसरेण अपि नाट्यमहोत्सवेऽस्मिन् सोत्साहं भागः गृहीतः। अयं नाट्यमहोत्सवः २७.०२.२०१७ दिनाङ्कतः ०१.०३.२०१७ दिनाङ्कपर्यन्तं महता उल्लासेन समायोजितः अभवत्। अस्मिन् वत्सरे आधुनिकसंस्कृतलेखकैः रचितानां नाटकानां प्रस्तुतयः अभूवन्। २७.०२.२०१७ तमे दिनाङ्के नाट्यमहोत्सवस्यास्य शुभारम्भः संस्थानस्य कुलपतिना आचार्यपरमेश्वरनारायणशास्त्रिणा मुख्यातिथेः हिमाचलप्रदेशस्य केन्द्रीयविश्वविद्यालस्य कुलपतेः डॉ. कुलदीपचन्द्राग्निहोत्रीवर्यस्य तथा आचार्यवेम्पटिकुटुम्बशास्त्रिप्रमुखाणां च गौरवभूतानाम् अतिथीनां सान्निध्ये विहितः। ततः परं भोपालस्थनाट्यानुसन्धानकेन्द्रस्य कुशीलवैः भव्यस्य पूर्वरङ्गस्य उपस्थापनं विहितम्। ततश्च क्रमशः विविधपरिसराणां नाट्यप्रदर्शनं समारब्धम्। श्रीरघुनाथकीर्तिपरिसरेण तु परिसरप्राचार्यस्य आचार्यस्य के.बी.सुब्बरायुडुवर्यस्य समुचितेन मार्गदर्शने श्रीनागराजराववर्येण विरचितस्य 'दाम्पत्यकलहम्' इति नाटकस्य अभिमञ्चनं २८.०२.२०१७ तमे दिनाङ्के कृतम्।

श्रीरघुनाथकीर्तिपरिसरेण ऐदम्प्राथम्येन महोत्सवेऽस्मिन् भागं गृहित्वा 'दाम्पत्यकलहम्' इति नाटकमभिनीतम्, सांत्वनापुरस्कारश्च लब्धः। यदर्थं प्राचार्यसमेताः निर्देशकाः प्रतिभागिनश्छात्राश्च सर्वेऽपि प्रशंसाभाजः अभूवन्। ''दाम्पत्यकलहम्'' इति श्रीरघुनाथकीर्तिपरिसरेण प्रस्तुतस्य रूपकस्य कृते सर्वश्रेष्ठाभिनेतृपुरस्कारं प्राप्नोत् शास्त्रिप्रथमवर्षस्य छात्रः लोकेशशर्मा, द्वितीयपुरस्कारेण सभाजिता अभूत् निशाशर्मा, तृतीयं पुरस्कारं प्राप्नोत् आयुषतिवारी। नाटकस्यास्य निर्देशनम् अकार्षीत् ज्योतिषविभागस्य प्राध्यापकः डा. मुकेशकुमारः, सहनिर्देशकश्चासीत् सङ्गणकप्राध्यापकः श्रीपङ्कजकोटियालः। अस्य नाट्यदलस्य मार्गदर्शिका आसीत् पल्लवीबन्दोलिया। परिसरप्राचार्यस्य प्रो. के.बी.सुब्बरायुडुवर्यस्य सत्प्रेरणया २५.०२.२०१७ दिनाङ्के परिसरात् प्रस्थितः अयं गणः सोत्साहं नाट्यमहोत्सवे भागं गृहीत्वा ०२.०३.२०१७ दिनाङ्के परिसरं समागतः।



'दाम्पत्यकलहम्' इति नाटकस्य कुशीलवाः विशिष्टाः विद्वांसश्च

## प्रकाशिताः विभागीयाः पत्रिकाः


देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य व्याकरण-साहित्य-ज्योतिष-वेद-न्याय-आधुनिकविभागैः स्व-स्व-विभागीयाः शोधपत्रिकाः प्रकाशिताः। व्याकरणविभागस्य **शाब्दी त्रिपथगा**, साहित्यविभागस्य **साहिती**, ज्योतिषविभागस्य **दैवी**, वेदविभागस्य **आम्नायहैमवती**, न्यायविभागस्य **न्यायशास्त्रार्थप्रकर्षः** आधुनिकविभागस्य **आधुनिकशोधत्रिवेणी** चेति षड् विभागीयाः शोधपत्रिकाः अस्मिन् पर्याये प्रकाशिताः अभूवन्। एताः सर्वाः अपि पत्रिकाः प्रतिवर्षं तत्तद्विभागेषु अनुसन्धानकार्यं संवर्धयितुं विशेषतः प्रकाशयिष्यन्ते। तत्तत्पत्रिकासु विभागीयाः प्राध्यापकाः सम्पादकाः वर्तन्ते। सर्वासु च पत्रिकासु परिसरप्राचार्यः पदेन प्रधानसम्पादको वर्तते।

उपर्युक्ताः पत्रिकाः अतिरिच्य परिसरेण चतस्रः पत्रिकाः प्रकाश्यन्ते। तासां पत्रिकाणां विवरणमित्थं वर्तते–


**१. देवभूमिसौरभम् ( अन्ताराष्ट्रिया वार्षिकी शोधपत्रिका )**–इयं पत्रिका शोधलेखप्रकाशनाय समर्पिता वर्तते। अस्यां पत्रिकायाम् अन्ताराष्ट्रियस्तरे भारतीय-प्राच्यविद्याक्षेत्रे कृतभूरिश्रमाणां विदुषां गभीराः विद्वत्तापूर्णाश्च लेखाः प्रकाशयिष्यन्ते। एतस्या शोधपत्रिकायाः सम्पादकमण्डलमित्थं वर्तते–प्रो. बनमाली बिश्वालः, डा. प्रफुल्लगडपालः तथा डा. मुकेशकुमारश्च।

परिसरप्रकाशनानि

**२. संस्कृतगङ्गा ( परिसरीया वार्षिकी शोधपत्रिका )**–परिसरेण परिसरस्तरे "संस्कृतगङ्गा"-नाम्नी वार्षिकी शोधपत्रिका प्रकाशयिष्यते। अस्यां शोधपत्रिकायां परिसरीयाणां प्राध्यापकानां, शोधच्छात्राणां च शोधलेखाः प्रकाशयिष्यन्ते। एतस्याः शोधपत्रिकायाः सम्पादकमण्डलमित्थं वर्तते–डा. आर. बालमुरुगन्, डा. सुशीलप्रसादः, डा. अरविन्दगौरः तथा डा. शैलेन्द्रप्रसादउनियालश्च।






**३. रघुनाथकीर्तिपताका ( परिसरीया वार्षिकी पत्रिका )**–परिसरीयाणां वार्षिकाणां क्रियाकलापानां विवरणम् उपस्थापयितुं परिसरेण इयं "रघुनाथकीर्तिपताका" इति वार्षिकी पत्रिका प्रकाशयिष्यते। अस्यां पत्रिकायां परिसरीयगतिविधिभिस्सह प्राध्यापकानां छात्राणां च साहित्यिकरचनाः अपि प्राकाश्यं गमिष्यन्ति। इत्थमत्र परिसरस्य वार्षिकगतिविधयः, अभिनवाः योजना-परियोजनाः, प्राध्यापकछात्राणां साहित्यिकरचनाः चेत्यादयो विषयाः प्रकाशयिष्यन्ते। अस्याः पत्रिकायाः सम्पादकमण्डलम् अनेन प्रकारेण वर्तते–डा. सुरेशशर्मा, डा. वीरेन्द्रबर्त्वालः, डा. निपुणचौधरी, श्रीपङ्कजकोटियालः तथा श्रीसन्दीपसिंहरावतश्च।






**४. रघुनाथवार्तावली ( परिसरीया त्रैमासिकी वार्तापत्रिका )**–त्रैमासिक्यामस्यां पत्रिकायां परिसरस्य समस्तानां क्रियाकलापानां गतिविधिनां च विवरणं प्रदास्यते। इयं पत्रिका भागद्वये भविष्यति–प्रथमः खण्डः वार्ताखण्डः तथैव द्वितीयः खण्डश्च साहित्यखण्डः इति। अस्याः पत्रिकायाः सम्पादकमण्डलम् एवंप्रकारेण वर्तते–डा. शैलेन्द्रनारायणकोटियालः, श्रीश्रीओमशर्मा, डा. मनीषजुगराणश्च। अत्र च परामर्शमण्डले प्रो. बनमाली बिश्वालः तथा डा. प्रफुल्लगडपालः च वर्तेते। अद्यावधि अस्याः पत्रिकायाः चत्वारः अङ्काः प्रकाशिताः जाताः।


एताः पत्रिकाः अचिरादेव प्रकाशिताः भविष्यन्ति। एतासां सर्वासां पत्रिकाणां प्रधानसम्पादकः भवति परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयः।




## परिसरे शोधसमित्युपवेशनं सम्पन्नम्

देवप्रयागस्थ-श्रीरघुनाथ-कीर्ति-परिसरे स्थानीयशोधसमितेः उपवेशनं ०६.०५.२०१७ तमे दिनाङ्के सायं ४.०० वादने परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य अध्यक्षतायां सम्पन्नम्। अस्मिन् उपवेशने शोधसमितिसमन्वयकः प्रो. बनमालीबिश्वालः, परिसरीय-आभ्यन्तरसदस्यः डा. बालमुरुगन् बाह्यसदस्या प्रो. विनीतघिल्डियालः (संस्कृत-विभागाध्यक्षा, श्रीनगरस्थ-हेमवतीनन्दन-बहुगुणागढवालविश्वविद्यालयः) च उपस्थिताः आसन्। अपरः परिसरीय-आभ्यन्तरसदस्यः डा. प्रफुल्लगडपालः अवकाशत्वात् उपस्थितो भवितुं नाशक्नोत् तथैव बाह्यसदस्यः प्रो. महावीरप्रसाद-अग्रवालः (कुलपतिचरः, उत्तराखण्डसंस्कृत-विश्वविद्यालयः) च कैश्चित् अपरिहार्यैः व्यक्तिगतकारणैः अनुपस्थितः आसीत्।

उपवेशनेऽस्मिन् परिसरीयग्रन्थालयसम्बद्धविषयेषु, परिसरीय-शोध-प्रकाशनविषये (ग्रन्थ-पत्र-पत्रिकादिप्रकाशनविषये)- अन्ताराष्ट्रिय-राष्ट्रियसंगोष्ठीविषये कार्यशालादिबिन्दुषु च विचारः सञ्जातः। अत्र च सर्वसम्मत्या अधोलिखिताः निर्णयाः स्वीकृताः–

**१. आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य ( Resource centre for Modern Sanskrit literature इत्यस्य ) पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रस्य ( Centre for Manuscript presevation and Research इत्यस्य ) च ग्रन्थालस्योपविभागत्वेन संस्थापनम्–**परिसरीयग्रन्थालये अध्ययन-अनुसन्धानादिदृष्ट्या केषुचित् केन्द्राणाम् उद्घाटनं कर्तुं शक्यते। यथा–आधुनिकसंस्कृत- साहित्यसंसाधनकेन्द्रस्य (Resource centre for Modern Sanskrit literature इत्यस्य) पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रस्य (Centre for manuscript presevation and Research इत्यस्य) चेति। एतयोः केन्द्रयोः समुद्घाटनं ग्रन्थालस्योपविभागत्वेन कर्तुं शक्यते। वर्तमानसमये भारते न कुत्रचित् ग्रन्थालये समकालिकसंस्कृतसाहित्यस्य विविधानां विधानाम् उपविधानां च ग्रन्थानां (गद्यकाव्य-पद्यकाव्य-नाट्यकाव्यानां) सङ्कलनं जातम्। तथैव साम्प्रतमपि लक्षशः दुर्लभाः महत्त्वपूर्णाश्च हस्तलेखाः अप्रकाशिताः उपेक्षिताश्च सन्ति, येषां सम्पादनं प्रकाशनम् अत्यावश्यकं वर्तते। अतः शोधसमित्या निर्णयः स्वीकृतः यत् परिसरीयग्रन्थालये उपर्युक्तयोः केन्द्रयोः प्रतिष्ठापना भवेदिति, येन हि सम्पूर्णात् भारतवर्षाद् अत्र आधुनिकसंस्कृतसाहित्ये हस्तलेखेषु वा आधारितं शोधकार्यं कर्तुं शोधार्थिनः विद्वांसो वा समागत्य लाभान्विताः भवेयुरिति। परिसरीयं ग्रन्थालयं समृद्धं कर्तुम् उत्तराखण्डस्य (विशेषतः देवप्रयागस्थानां केषाञ्चन गणमान्यानां कवीनां विदुषां च) निजसंग्रहात् ग्रन्थान् पाण्डुलिपीश्च संग्रहितुं प्रस्तावः प्रेषयितुं शक्यते। यथा– आचार्यचक्रधरजोशि-डा. शशिधरशर्म-स्व. मुकुन्ददैवज्ञादीनां निजसंग्रहात् ग्रन्थान् पाण्डुलिपीश्च प्राप्य ताः संरक्षयितुं शक्यते।

**२. 'उत्तराखण्डविद्यावैभवम्' इति विषये त्रिदिवसीयायाः अन्ताराष्ट्रियसंगोष्ठ्याः आयोजनम्–**उत्तराखण्डस्य कवीनां, शास्त्रकाराणाम् आचार्याणां च संस्कृतस्य सर्वाः विद्याः प्रति यद्धि महनीयं योगदानम् आसीत्, तस्य सामग्रिकम् आकलनं कर्तुं परिसरे पूर्वप्रस्तावितायाः 'उत्तराखण्डविद्यावैभवम्' इति विषयिण्याः त्रिदिवसीयायाः अन्ताराष्ट्रियसंगोष्ठ्याः आयोजनं कर्तुं शक्यते इति।

**३. राष्ट्रिय-कार्यशालयोः समायोजनम्–**अग्रिमे शैक्षिकसत्रे परिसरे 'कविशिक्षा' 'अनुवादप्रविधिः – सिद्धान्तः प्रयोगश्च' इत्येतयोः विषये पृथक्पृथग्रूपेण द्वे राष्ट्रियकार्यशाले समायोजयितुं शक्येते।

**४. शोध-प्रकाशने–**व्याकरण-साहित्य-ज्योतिष-वेद-न्यायविभागेषु प्राक्शास्त्रि-शास्त्रि-आचार्य-विद्यावारिधि (पीएच.डी.) उपाधये नियमित- शिक्षणेन सह शोधप्रकाशनेऽपि प्रमुखशैक्षिकगतिविधिषु अन्यतमे वर्तेते। तद्दृष्ट्या परिसरे प्रस्तावितानां चतसृणां नियमितानां संस्कृतपत्रिकाणां ('देवभूमि-सौरभम्', 'संस्कृतगङ्गा', 'रघुनाथकीर्तिपताका' 'रघुनाथ-वार्तावली' चेत्येतासां) प्रकाशनं नूनं स्तूत्यो उद्यमो वर्तते। एताः अतिरिच्य, परिसरस्य सर्वेभ्यः विभागेभ्यः ०६ विभागीयपत्रिकाणां प्रकाशनमपि उत्तमः प्रयासः अस्ति। परिसरस्य शैक्षणिकसदस्यैः प्रस्तावितानां नवीनानां ग्रन्थानां प्रकाशनविषये अपि अत्र विचारः सञ्जातः।


संस्थापनम्

## प्रगतिपथे वर्तते परिसरभवनानां निर्माणकार्यम्

### परिसरस्य रक्षाभित्तिः निर्मीयते


इदानीम् अस्य देवप्रयागस्थस्य श्रीरघुनाथकीर्तिपरिसरस्य निर्माणकार्यं द्रुतगत्या प्रचलद् दृश्यते। अस्य निर्माणकार्यं केन्द्रीयलोकनिर्माणविभागेन क्रियते। यद्यपि पर्वतीयेषु क्षेत्रेषु निर्माणकार्यं दुष्करं भवति, तथापि मासाभ्यन्तरे एव केन्द्रीयलोकनिर्माणविभागस्य कर्मचारिगणैः रघुनाथकीर्तिपरिसरभवनस्य सुदृढा रक्षाभित्तिः सपदि एवं निर्मिता। भित्तिनिर्माणेन साम्प्रतं तु अयं प्राचीरः नृसिंहाचलपर्वतस्य कण्ठे माला इव शोभते।

निर्माणम्



परिसरीयसीमाभीतेः निर्माणकार्यं प्रवर्तते

# प्राचार्यस्य दैनन्दिनी



२३-२४.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागस्य राष्ट्रियशोध-सङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

२४-२५.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागस्य राष्ट्रियशोध-सङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

२५.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य कविसम्मेलने अध्यक्षपदम् अलङ्कृतम्।

२७-२८.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य ज्योतिषविभागस्य राष्ट्रियशोध-सङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

२८-२९.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य वेदविभागस्य राष्ट्रियशोध-सङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

२९-३०.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य अधुनिकविभागस्य राष्ट्रियशोध-सङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

३०-३१.०१.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागस्य राष्ट्रियशोधसङ्गोष्ठ्याम् अध्यक्षपदम् अलङ्कृतम्।

१८-२०.०२.२०१७ NAAC इत्यस्य अभिमुखीकरणकार्यक्रमे भागग्रहणम्।

११-१३.०२.२०१७ अगरतलास्थ-स्वामिविवेककानन्दमहाविद्यालयेन आयोजितायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यां विशिष्टातिथित्वं सत्राध्यक्ष्यत्वं च सम्पादितम्।

१५.०२.२०१७ तेलङ्गानास्थ-बासरक्षेत्रे महर्षिसान्दीपनीवेदविद्याप्रतिष्ठानस्य नामितसदस्यत्वेन निरीक्षणं विहितम्।

१७.०२.२०१७ भारतशासनस्य मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह परिसरभवननिर्माणविषये परिचर्चा विहिता।

२७.०२.२०१७-०१.०३.२०१७ नवदेहल्यां कौमुदीमहोत्सवे भागग्रहणम्।

०३.०३.२०१७ उत्तराखण्डसंस्कृतविश्वविद्यालयस्य न्यायविभागेन आयोजितायां राष्ट्रियकार्यशालायां समापनसत्रे मुख्यातिथित्वेन सम्बोधनम्।

०६.०३.२०१७ राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरेण आयोजितायां द्विदिवसीयायां दर्शनशास्त्रीयराष्ट्रियसंगोष्ठ्याम् उद्घाटनसत्रे मुख्यातिथ्यं कस्यचिदेकस्य सत्रस्य आध्यक्ष्यं च।

०४.०३.२०१७ हरिद्वारस्थस्य श्रीभगवानदास-आदर्शमहाविद्यालयस्य कार्यक्रमे मुख्यातिथिरूपेण सम्बोधनम्।

१७.०३.२०१७ राष्ट्रियसंस्कृतसंस्थाने भवननिर्माणसमिते: उपवेशने भागग्रहणम्।

१९.०३.२०१७ प्रबन्धसमिते: उपवेशने भागग्रहणम्।

२१.०३.२०१७ मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह परिसरभवननिर्माणसमिते: उपवेशनम्।

०६.०४.२०१७ देवप्रयागस्थ-ओङ्कारानन्द-सरस्वती-राजकीय-महाविद्यालये वार्षिकोत्सवे मुख्यातिथ्यम्।

१७.०४.२०१७ देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य विद्यावारिधि-प्रवेश-परीक्षायां स्थानीयपर्यवेक्षकत्वेन दायित्वनिर्वहणम्।

२१.०४.२०१७ बलाहारस्थ-वेदव्यासपरिसरे आयोजितायां राष्ट्रियसंगोष्ठ्याम् उद्घाटनकार्यक्रमे मुख्यातिथ्यम्।

२४.०४.२०१७ नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थाने अद्वैतवेदान्तविषये आयोजिते शैक्षिकपरिषद् (Board of Studies) इत्यत्र समुपस्थिति:।

२७.०६.२०१७ नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थाने शिक्षानिकायस्य (Academic council इत्यस्य) प्राचार्योपवेशने समुपस्थिति:।

०४.०७.२०१७ टिहरीगढवाले सिलवालग्रामे शिवसंस्कृतविद्यालयस्य वित्तीयसहायतार्थं निरीक्षणकार्यं विहितम्।

## सुसम्पन्नः दशदिवसीयः आवासीयसंस्कृतभाषाबोधनवर्गः





समापनसत्रे सभां सम्बोधयन् डॉ. बुद्धदेवशर्मा

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य छात्रावासे मईमासस्य तृतीयदिनाङ्कतः त्रयोदशदिनाङ्कपर्यन्तम् 'आवासीयसंस्कृतभाषाबोधनवर्गः' समचाल्यत। वर्गस्यास्य दीपप्रज्वालनपुरस्सरं समुद्घाटनं कृतं परिसरप्राचार्येण आचार्येण के.बी. सुब्बरायुडुवर्येण, मुख्यातिथिना व्याकरणविभागाध्यक्षेण आचार्यबनमालीविश्वालवर्येण च। अवसरेऽस्मिन् परिसरस्य साहित्यविभागाध्यक्षः डा. प्रफुल्लगडपालः समुपस्थाय संस्कृतसंभाषणस्य महत्त्वं प्रत्यपादयत्। "संस्कृतं जनभाषा भवेत् एतदर्थं सर्वैरपि मिलित्वा प्रयासः विधेयः" इति ध्येयं स्वीकृत्य एव वर्गे सुष्ठुभाषाभ्यासः कर्तव्यः इति उद्बोधितं मुख्यातिथिना उद्घाटनकार्यक्रमे।

अस्मिन् वर्गे श्रीरघुनाथकीर्तिपरिसरस्य 22 छात्राः, 4 शिक्षकाः, 2 कर्मचारिणौ, श्रीरघुनाथकीर्तिआदर्शविद्यालयस्य 12 छात्राः, हैदराबादतः वेदगुरुकुलात् समागताः 14 छात्राः, एकः देवप्रयागस्थः नागरिकः, एवमाहत्य 55 जनाः प्रतिभागित्वेन भागम् अगृह्णन्। अत्र शिक्षकत्वेन परिसरस्य एव डा. बनमालीविश्वालः, डा. मनीषजुगरानः, डा. मुकेशकुमारः, देहरादूनतः अनौपचारिकशिक्षकः श्रीदेवीलालः, संस्कृतभारतीसंघटनस्य श्रीनीरजजुगरानः, श्रीमधुसूदनः, श्रीविशालः, श्रीनीरजकुमारप्रभृतयः मार्गदर्शनं कृतवन्तः।

आवासीयवर्गेऽस्मिन् प्रातः 5 वादनादारभ्य रात्रौ 10.30 वादनपर्यन्तं विविधेषु सत्रेषु योगाभ्यासः, प्रत्यक्षविधिना सम्भाषणाभ्यासः, भाषाशुद्ध्यर्थं प्रारम्भिकस्तरीयव्याकरणाभ्यासः, क्रीडाद्वारा भाषाभ्यासः, संस्कृतगीत-नाटक-कथाकथन-श्लोकोच्चाराणाभ्यासादिविषयाः शिक्षिताः। आहत्य दशदिनेषु छात्राः सामूहिकभावनया तिष्ठन्तः संस्कृतसम्भाषणाभ्यासं कृतवन्तः।



बोधनवर्गस्य किञ्चन दृश्यम्

वर्गस्यास्य समापनकार्यक्रमः मईमासस्य 12 दिनाङ्के प्रवृत्तः यत्र मुख्यातिथित्वेन समाहूतः आसीत् देवप्रयागस्थभाजपादलस्य अध्यक्षः श्रीमान् गैन्दालालवर्यः। विशिष्टातिथिपदमलङ्कृतवान् उत्तराखण्ड-संस्कृताकादम्याः पूर्वसचिवः डा. बुद्धदेवशर्मवर्यः। सारस्वतातिथिरूपेण सम्प्राप्तः संस्कृतभारतीसंघटनस्य पश्चिमोत्तरक्षेत्रस्य क्षेत्रसंघटनमन्त्री श्रीमान् प्रतापसिंहवर्यः। सर्वेऽपि गणमान्याः स्वीये उद्बोधने संस्कृतभाषायाः महत्त्वं द्योतयित्वा वर्तमानकाले अस्याः भाषायाः प्रासङ्गिकताम् आवश्यकतां च निरूपितवन्तः। कार्यक्रमस्यास्य अध्यक्षपदमलङ्करोत् परिसरप्राचार्यः आचार्यः के.बी.सुब्बरायुडुवर्यः। तेन देवप्रयागनगरं संस्कृतमयं करणीयमिति समुद्घोषणां विधाय तदर्थं सर्वैः कटिबद्धैः भाव्यमिति प्रतिज्ञा कारिता। १३.०५.२०१७दिनाङ्के उषसि एव अस्य वर्गस्य दीक्षान्तकार्यक्रमः भारतीपूजनपूर्वकं समनुष्ठितः यत्र सर्वेऽपि प्रतिभागिनः संस्कृतस्य प्रचारार्थं कृतसङ्कल्पाः अभूवन्। वर्गस्य संयोजकौ आस्ताम् डा. मनीषजुगरानः डा. मुकेशकुमारश्च।

## मातृभाषादिवसः आचरितः




मातृभाषादिवसकार्यक्रमे मञ्चसञ्चालनं कुर्वन् डॉ. वीरेन्द्रबर्त्वालः, मञ्चे दृश्येते- प्रो. के.बी. सुब्बरायुडुः, श्रीप्रीतमसिंहभरतवाणश्च

फरवरीमासस्य २१ दिनाङ्के परिसरे मातृभाषादिवसः आयोजितः। एतदवसरे परिसरे गीतभाषणप्रतियोगितेऽपि आयोजिते । अवसरेऽस्मिन् उत्तराखण्डस्य प्रसिद्धो लोकगायकः श्रीमान् प्रीतमसिंहभरतवाणः समागतः। स्वीये उद्बोधने सः उक्तवान् यत् अस्माकं संस्कृतेः संरक्षणस्य संवर्द्धनस्य सञ्चारणस्य च प्रमुखं साधनं मातृभाषैव वर्तते। अस्माभिः सर्वैरपि स्वीयमातृभाषायाः दैनन्दिनजीवने अवश्यमनुप्रयोगो विधातव्यः। कार्यक्रमेऽस्मिन् आध्यक्ष्यं निर्वहता परिसरप्राचार्येण प्रो. के.बी. सुब्बारायुडुवर्येणापि मातृभाषायाः संवर्धनविषये मार्गदर्शनमकारि। मातृभाषा-दिवसमुपलक्ष्य छात्रैः स्वीयमातृभाषायां नैके कार्यक्रमाः प्रस्तुताः। एतदवसरे साहित्यप्राध्यपकेन डॉ. प्रफुल्लगडपालेन कार्तज्ञ्यज्ञापनं विहितम्। कार्यक्रमस्यास्य संयोजनं हिन्दीप्राध्यापकः डा. वीरेन्द्रबर्त्वालः अकरोत्।

**डा. आर बालमुरुगन्**–जनवरीमासे न्यायविभागीयासङ्गोष्ठ्याः संयोजकदायित्वं निरवहत्। ''वेदान्तशास्त्रे न्यायशास्त्रस्य प्रभावः'' इति विषयं समधिकृत्य शोधपत्रं च प्रस्तुतम्।

**डा. प्रफुल्लगडपालः**–देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे साहित्यविभागे सहायकाचार्यत्वेन कार्यं कुर्वाणो डा. प्रफुल्लगडपालः २४-२५ जनवरी, २०१७ इत्यवधौ आयोजितायां साहित्यविभागीयायां राष्ट्रियसंगोष्ठ्यां संयोजकत्वेन सुष्ठु दायित्वं निरवहत्, तत्र अनूदितलघुकथाविषये शोधपत्रं च प्रस्तुतवान्। २४ जनवरी, २०१७ दिनाङ्के अनेन साहित्यविभागे 'समकालिकसंस्कृतसाहित्यस्य नवीनाः प्रवृत्तयः' इत्यस्मिन् विषये प्रो. अभिराजराजेन्द्रमिश्रमहोदयस्य विशिष्टव्याख्यानमपि समायोजितम्। २४.०१.२०१७ तमे दिनाङ्के परिसरे सम्पन्नस्य अखिलभारतीयसंस्कृतकविसम्मेलनस्य संयोजनम् विहितम्। २५.०१.२०१७ तमे दिनाङ्के परिसरे अस्य पालिभाषाविषये रचितौ द्वौ ग्रन्थौ प्रकाशितौ लोकाय अर्पितौ। परिसरेण प्रकाशितायाः वार्तापत्रिकायाः 'रघुनाथवार्तावली' इत्यस्याः परामर्शदातृरूपेण पत्रिका सम्पादिता। अनेन परिसरस्य साहित्यविभागीया शोधपत्रिका 'साहिती' सम्पादिता। अन्ताराष्ट्रियशोधपत्रिकायाः 'देवभूमिसौरभम्' इत्यस्याः सम्पादनकर्मणि अपि च परिसरस्य अन्तर्जालसम्पादने संयुक्तरूपेण संरतः।

**डा. मनीषजुगरानः**–श्रीरणवीरपरिसरे २५ दिसम्बरतः २ जनवरीपर्यन्तम् आयोजिते केन्द्रीयविद्यालयाध्यापकानां प्रशिक्षणवर्गे प्रशिक्षकत्वेन भागं गृहीतवान्। जनवरीमासस्य ६-८ दिनाङ्कं यावत् उडुपिनगरे संस्कृभारतीद्वारा संस्कृतभारतं समर्थभारतम् इति विषये आयोजिते अखिलभारतीये अधिवेशने भागं गृहीतवान्। परिसरे आयोजितासु चतसृषु सङ्गोष्ठीषु शोधपत्राणि प्रस्तुतवान्। भोपालपरिसरे फरवरीमासस्य ११-१२ दिनाङ्कयोः आयोजितायां राष्ट्रियसङ्गोष्ठ्यां "भाषाशिक्षणे तदधिगमे च ई-अधिगमः" इति विषये शोधपत्रं प्रस्तुतवान्। ऋषिकेशे संस्कृतच्छात्रसेवासमितिद्वारा आयोजिते सम्मेलने मुख्यवक्तृत्वेन "संस्कृतशिक्षायां समस्याः तन्निवारणोपायाश्च" इति विषये सम्बोधितवान्। उत्तराखण्ड-संस्कृत-अकादमीद्वारा मार्चमासे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'मनुस्मृतौ गुरुशिष्यसम्बन्धः' इति विषये शोधपत्रं प्रस्तुतवान्।

**डा. मुकेशकुमारः**–जनवरीमासस्य नवदशे दिनाङ्के शृङ्गेरीस्थे राजीवगान्धीपरिसरे समायोजिते रजतमहोत्सवे छात्रचरसंगोष्ठ्यां भागं गृहीत्वा ''अद्यत्वे ज्योतिषशास्त्रीयमौल्यानां संरक्षणमिति'' विषये स्वविचारम् उपास्थापयत्। जनवरीमासस्य एव २६-२७ दिनाङ्कयोः श्रीरघुनाथकीर्तिपरिसरे समायोजितायाः ज्योतिषशास्त्रीयराष्ट्रियसंगोष्ठ्याः संयोजकत्वेन दायित्वं निरवहत्। फरवरीमासस्य २७ दिनाङ्कतः मार्च १ दिनाङ्कपर्यन्तं देहल्यां प्रवृत्ते १४ नाट्यमहोत्सवे श्रीरघुनाथकीर्तिपरिसरद्वारा प्रस्तुतस्य ''दाम्पत्यकलहम्'' इत्याख्यनाटकस्य निर्देशनदायित्वं निरवहत्। राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन १५ तः २४ मार्चपर्यन्तं इलाहाबादस्थे श्रीगंगानाथझापरिसरे आयोजितायां ज्योतिषपाठलेखनसम्पादनकार्यशालायां भागमग्रहीत्।

**श्रीश्रीओमशर्मा**–१९.०१.२०१७ तमे दिनाङ्के श्रीनगरस्थ-राष्ट्रियप्रौद्योगिकीसंस्थाने आयोजितायां कार्यशालायां विशिष्टवक्तृरूपेण 'भारतीय संस्कृति अब हिन्दी के आसरे' इति विषयमवलम्ब्य विशिष्टव्याख्यानं प्राददत्। २३.०१.२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे व्याकरणविषयिण्यां शोधसङ्गोष्ठ्यां शोधपत्रवाचनमकरोत्। २८-०१-२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे वेदविषयिण्यां राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रवाचनमकरोत्। ३०-०१-२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे न्यायविभागीयायां राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रं प्रस्तुतम्। २६-०२-२०१७ तमे दिनाङ्के रा.सं.सं. भोपालपरिसरे राष्ट्रियशोधसङ्गोठ्यां विभक्त्यर्थविषयान्तर्गतम्- ''साधकतमं करणमिति सूत्रस्य सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिनीदृष्ट्या समीक्षणम्'' इत्याख्यं शोधपत्रं प्रास्तौत्।

**डा.शैलेन्द्रप्रसादउनियालः**–२७-२८.०१.१७ दिनाङ्कयोः व्याकरणविभागीयसङ्गोष्ठ्यां पातञ्जलमहाभाष्ये लौकिकालौकिका-लौकिकपक्षयोः उपयोगित्वम् इति, २८-२९.०१.१७ दिनाङ्कयोः ज्यौतिषविभागीयायां सङ्गोष्ठ्यां वेदालोके गोलविमार्शान्तर्गतभूर्लोकादि-स्वरूपविवेचनम् इति, २९-३०.०१.१७ दिनाङ्कयोः वेदाविभागीयायां सङ्गोष्ठ्यां संयोजकत्वं प्रास्ताविकं प्रतिवेदनं च कृत्वा वैदिकवाङ्मये श्रुतिसम्प्रदायः इति, ३०-३१.०१.१७ दिनाङ्कयोः आधुनिकविभागेन समायोजितायां सङ्गोष्ठ्यां ''गढवाली लोक साहित्य पर वैदिक प्रभाव" इति, २९-३०.०१.१७ दिनाङ्कयोः न्यायशास्त्रविभागीयायां सङ्गोष्ठ्यां ''न्यायशास्त्रस्य शास्त्रान्तरे लोके च प्रभावः'' इति विषयमधिकृत्य स्वीयानि शोधपत्राणि प्रास्तौत्। उत्तराखण्डसंस्कृतअकादमीद्वारा समायोजिताखिलभारतीयशोधसम्मेलने स्मृतिवाङ्मये पञ्चमहायज्ञाः इति विषयमवलम्ब्य शोधपत्रं प्रस्तुतवान्।

**डॉ. सुरेशशर्मा**–श्रीरघुनाथकीर्तिपरिसरे २४-२५ जनवरी २०१७ इत्यवधौ व्याकरणस्य राष्ट्रियसंगोष्ठ्यां 'महाभाष्ये पतञ्जलिकालीनकृषिव्यवस्था' इति विषयोपरि शोधपत्रं प्रास्तौत्। २७-२८ जनवरी, २०१७ इत्यवधौ ज्यौतिषस्य राष्ट्रियसङ्गोष्ठ्यां ''प्राचीनार्वाचीनज्योतिर्विज्ञानदृष्ट्या गोलानयोः विचारः'' इति विषयोपरि शोधपत्रं प्रास्तौत्। २९-३० जनवरी २०१७ इत्ययवधौ '' वेदेषु राष्ट्रचेतना'' इति विषयमधिकृत्य समायोजितायां राष्ट्रियसङ्गोष्ठ्यां '' वेदेषु राष्ट्रसंरक्षणोपायाः'' इति विषयोपरि शोधपत्रं प्रास्तौत्। ३०-३१ जनवरी २०१७ इत्यवधौ न्यायशास्त्रस्य राष्ट्रियसङ्गोष्ठ्यां ''न्यायोक्तकालोपाधीनां ज्योतिषशास्त्रीयविवेचनम्'' इति विषयोपरि शोधपत्रं प्रास्तौत्। उत्तराखण्डसंस्कृतअकादमीहरिद्वारद्वारा २४-२५ जनवरी २०१७ इत्ययवधौ ''स्मृतिशास्त्रेषु विविधज्ञानविषयमधिकृत्य समायोजितायां राष्ट्रियसङ्गोष्ठ्यां '' मनुस्मृतौ कालविज्ञानम्'' इति विषयोपरि शोधपत्रं प्रास्तौत्।

## परिसरविदुषां शैक्षिकोपलब्धयः गतिविधयश्च

**प्रो. बनमालीबिश्वालः–**राष्ट्रिय-संस्कृत-संस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्ति-परिसरे २३.०१.२०१७ तः ३१.०१.२०१७ दिनाङ्कं यावद् आयोजितासु विविध-विभागीयासु राष्ट्रिय-संगोष्ठीषु नैकेषु सत्रेषु नैकविधं दायित्वं सम्पादितवान्। तत्रापि–२३.०१.२०१७-२४.०१.२०१७ दिनाङ्कयोः समायोजितायां व्याकरण-विभागीयायां द्विदिवसीयायां राष्ट्रिय-संगोष्ठ्यां विषयप्रवर्तनं कृतवान्, सत्राध्यक्षत्वं निर्व्यूढवान् तथा महाभाष्यस्य लौकिकोपयोगित्वम् इति विषयमधिकृत्य शोधपत्रं च प्रस्तुतवान्। २४.०१.२०१७-२५.०१.२०१ दिनाङ्कयोः "संस्कृतेऽनूदितं लघुकथा-साहित्यम्" इति विषयमधिकृत्य प्रवर्तितायां साहित्य-विभागीय-राष्ट्रियसंगोष्ठ्यां स्वागतभाषणं कृतवान् तथा सत्राध्यक्षत्वं निर्व्यूढवान्। २८-२९.०१.२०१७ दिनाङ्कयोः वेदविभागीय-सङ्गोष्ठ्यां तथा २९.१.२०१७-३०.१.२०१७ दिनाङ्कयोः च समायोजितायाम् आधुनिक-विषयक-राष्ट्रिय-संगोष्ठ्यां संस्कृतस्य आधुनिकं स्वरूपम् (संगणकीय-भाषाविज्ञानस्य विशेषसन्दर्भे) इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। २४.०१.१७ तमे दिनाङ्के देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे अखिलभारतीय-संस्कृतकविसमवाये काव्यपाठं प्रस्तुतवान्।

**सत्राध्यक्षः मनोनीतः प्रो. बिश्वालः–** पूर्वभारतीय-प्राच्यविद्यासम्मेलने (Eastern Indian Oriental Conference)। वारिपदास्थ-उत्तर-ओडिशा-विश्वविद्यालये २.४.१७ तः ४.४.२०१७ दिनाङ्कं यावदायोजितस्य पूर्वभारतीय-प्राच्यविद्यासम्मेलनस्य (Eastern Indian Oriental Conference) आधुनिक-संस्कृत-विभागस्य सत्राध्यक्षः मनोनीतः। प्रो. बिश्वालः एकाधारेण संस्कृत-कविः, कथाकारः, उपन्यासकारः, नाट्यकारः, प्राबन्धिकः तथा समीक्षकश्च वर्तते। दृक्-कथासरित्-पद्यबन्धादिमाध्यमेन समकालिक-संस्कृत-साहित्याय प्रो. बिश्वालस्य महत्त्वपूर्णं योगदानमनुभूय पूर्वभारतीय-प्राच्यविद्यासम्मेलनस्य सम्मानित-कार्यकर्तृभिः सर्वसम्मत्या एष निर्णयो गृहीतः इति परिसरस्य कृते गौरवमयोऽयं वृत्तान्तः।

०३.०२.२०१७ तः ०७.०२.२०१७ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य संस्कृतप्रगताध्ययन-केन्द्रे समायोजितायां पञ्चदिवसीय-योगविषयक-राष्ट्रिय-कार्यशालायाम् आधारपुरुषरूपेण उद्बोधितवान्। १६.०२.२०१७ तः १८.०२.२०१७ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य संस्कृतप्रगताध्ययन-केन्द्रे समायोजितायां प्राचीनार्वाचीन-भारतीय-नाटक-परम्परा-(Ancint and Modern Indian Dramatic tradition :Theory and Practice) विषयक-त्रिदिवसीय-अन्ताराष्ट्रिय-सम्मेलने सत्राध्यक्ष्यं निरवहत् तथा विशिष्टे चर्चासत्रे (Plenary Session) च आधुनिक-संस्कृत-नाटकस्य परिवर्तितं परिदृश्यम् इति विषयमधिकृत्य विशिष्ट-व्याख्यानं प्रदत्तवान्। ०४.०३.२०१७ तः ०५.०३.२०१७ दिनाङ्कं यावद् हरिद्वारस्थ-आदर्श-संस्कृत-महाविद्यालये समायोजितायां संस्कृतसाहित्यस्याधुनिकलेखन-परम्परा इति विषयक-द्विदिवसीय-राष्ट्रिय-संगोष्ठ्यां सत्राध्यक्षदायित्वं निरवहत् तथा आधुनिक-संस्कृत-काव्यशास्त्रेषु पद्यकाव्यस्य स्वरूपविमर्शः इति विषयमधिकृत्य विशिष्ट-व्याख्यानं च प्रदत्तवान्। एवमेव तत्र अखिलभारतीय-संस्कृतकविसमवाये अपि काव्यपाठं कृतवान्। ३०.०३.२०१७ तः ३१.०३.२०१७ दिनाङ्कं यावद् पुरीस्थ-जगन्नाथ-संस्कृत-विश्वविद्यालये समायोजितायां वेदव्याख्यान-परम्परायां वेदाङ्गान्यनुक्रमणिसाहित्यञ्च इति विषयक-द्विदिवसीय-राष्ट्रियसंगोष्ठ्यां सत्राध्यक्षीय-दायित्वं निरवहत् तथा आधारपुरुषरूपेण वेदव्याख्याने वेदाङ्गस्य व्याकरणस्य भूमिका (प्रातिशाख्यानां विशेषसन्दर्भे) इति विषयमधिकृत्य विशिष्ट-व्याख्यानं प्रदत्तवान्। अस्मिन्नवधौ नैकासां पत्र-पत्रिकाणां सम्पादनं कृतवान्। तद्यथा दृक् (३२-३३ अङ्कौ), कथासरित् (२३ अङ्कः) पद्यबन्धा (१० अङ्कः) च। उत्कलविश्वविद्यालयस्य गोरखपुर-विश्वविद्यालयस्य च द्वयोः शोधप्रबन्धयोः बाह्यपरीक्षकदायित्वं सम्पादितवान्। प्रो. बिश्वालस्य मार्गदर्शने प्रयागस्थ-गङ्गानाथझापरिसरस्य द्वौ शोधच्छात्रौ व्याकरणविभागे शोधप्रबन्धं प्रस्तुतवन्तौ। ०२.०४.२०१७ दिनाङ्कात् ०४.०४.२०१७ दिनाङ्कं यावद् वारिपदास्थ-उत्तर-ओडिशा-विश्वविद्यालये आयोजिते प्रथमे पूर्वभारतीय-प्राच्यविद्या-सम्मेलने (Eastern Indian Oriental Conference इत्यत्र) आधुनिकसंस्कृतसाहित्यसत्रे अध्यक्षीयं भाषणं प्रस्तुतवान् तथा समेषां सत्राणामाध्यक्ष्यं च निर्व्यूढवान्। तत्र च एकस्मिन् सत्रे आधुनिकसंस्कृतसाहित्ये पूर्वभारतस्य योगदानमिति विषयमधिकृत्य स्वकीयं शोधपत्रमपि प्रस्तुतवान्। ०३.०४.२०१७ तमे दिनाङ्के आयोजिते अखिलभारतीय-संस्कृत-कविसमवाये काव्यपाठमपि विहितवान्। २२.०४.२०१७ दिनाङ्के नवदेहलीस्थ-केन्द्रीय-साहित्य-अकादमी-नरेन्द्रपुरस्थ-रामकृष्ण-मिशन-आवासीय-महाविद्यालययोः संयुक्ततत्त्वावधाने कोलकातानगरे डा. वीरेन्द्रकुमारभट्टाचार्य-जन्मशतवार्षिक-समारोहमभिलक्ष्य आयोजिते परिसंवादे बीजवक्तृरूपेण बीजभाषणं प्रस्तुतवान्। तत्र च एकस्मिन् सत्रेऽपि अध्यक्षतां कृतवान् तथा चैकं शोधपत्रमपि प्रस्तुतवान्। ०४.०६.२०१७ तः १०.०६.२०१७ दिनाङ्कं यावत् पाण्डिचेरीस्थे अरविन्दाश्रमे (अरोविन्द-सोसाइटि नाम्न्यां संस्थायाम्) आयोजितायां कनिष्ठवर्ग-संस्कृत-पाठ्यक्रम-पाठ्यसामग्री-निर्माण-कार्यशालायां विषय-विशेषज्ञरूपेण भागं गृहीतवान्। १५.०६.२०१७ तमे दिनाङ्के गोरखपुर-विश्वविद्यालये एकस्याः शोधच्छात्रायाः बाह्यपरीक्षकरूपेण वाक्परीक्षां गृहीतवान्। मईमास-जूनमासयोश्च उत्कलविश्वविद्यालयस्य, गोरखपुरविश्वविद्यालयस्य तथा दिल्लीविश्वविद्यालयस्य च एकैकशः त्रयाणां शोधप्रबन्धानां बाह्यपरीक्षकदायित्वं सम्पादितवान्।

## देवभूमिपञ्चकम्

प्रापयति सुरलोकं मोक्षदं देवभोग्यं
तारयति भवसिन्धुं यत्र नित्यो निवासः।
जहति विविधतापं यत्र वासेन लोकाः
लसतु जगति धन्या पावनी देवभूमिः।। १।।

प्रवहति सुरगङ्गा पर्वतादग्रदेशात्
मिलति च सरिदेषा यत्र मार्गे नदीभिः।
सृजति च हर-गङ्गा सङ्गमान् यत्र नैकान्
लसतु जगति धन्या पावनी देवभूमिः।। २।।

हरति सकलपापं या च भूमिर्जनानां
जननमरणकष्टान्मोचयित्वा समन्तात्।
जनयति मरलोके देवभावं जडेषु
लसतु जगति धन्या पावनी देवभूमिः।। ३।।

प्रथयति समभूमिं स्थावरायां धरायाम्
रचयति नरलोके दिव्यदिव्यांश्च सौधान्।
क्षिपति पृथुनरेशः पर्वतान् यत्र देशे
लसतु जगति धन्या पावनी देवभूमिः।। ४।।

स्पृशति गगनलोकं यत्र चाद्रिर्यथेच्छं
भवति च परतन्त्रो यत्र सूर्यो नगानाम्।
पतति न समकालञ्चातपो यत्र देशे
लसतु जगति धन्या पावनी देवभूमिः।। ५।।

-प्रो. बनमाली बिश्वालः

## देवप्रयागसङ्गमः

अहो सुविख्यातहिमालयोऽयं,
दोलायते मे हृदि पुष्पगुच्छम्।
गङ्गातटे पावनभूमिभागे,
दृश्याणि रम्याणि मनोहराणि।।१।।

चिन्ता गता क्वापि कदा न जाने,
भक्तिश्च प्राप्ता रघुनाथदेवात्।
मन्दाकिनी मानवपावनाय,
देवप्रयागेऽत्र विराजते वै।।२।।

विश्वप्रसिद्धद्विनदीसुयोगः,
शान्तिं तनोत्यत्र जलप्रवाहे।
क्रीडन्ति मीनाः विहरन्ति कीटाः,
स्मरन्ति भक्ताः भगवन्तमत्र।।३।।

–पङ्कजः
साहित्याचार्यः (प्रथमवर्षम्)
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## संस्कृतं भारतम्

भास्वतो रश्मिभिर्भासते भूतले,
मामकीनं प्रियं संस्कृतं भारतम्।
चन्द्रतारागणैर्मण्डितं शोभितम् ,
मामकीनं प्रियं संस्कृतं भारतम्॥ 1 ॥

दिव्यमेतत् कृतं ब्रह्मणा सुन्दरं,
पर्वतैः काननैश्चातिरम्यं ध्रुवम्।
जाह्नवी पावनी तारिणी यत्र तद्,
मामकीनं प्रियं संस्कृतं भारतम्॥ 2 ॥

जीवनेऽहर्निशं मंगलं वै शुभं,
लौकिकालौकिकं सर्वमेतत्सुखम्।
प्राप्तुकामा यतन्ते जना यत्र तद्,
मामकीनं प्रियं संस्कृतं भारतम्॥ 3 ॥

अद्रिराजो विशालः किरीटं शुभं,
यत्र सिन्धुर्महासागरो रत्नदः।
कीर्तिदं भुक्तिदं मुक्तिदं यद्धि तद्,
मामकीनं प्रियं संस्कृतं भारतम्॥ 4 ॥

यत्र कृष्णेन गीतोपदेशः कृतः,
यत्र बुद्धेन मार्गो वरो दर्शितः।
ज्ञानमेवेह जैनैर्हि दत्तं महद्,
मामकीनं प्रियं संस्कृतं भारतम्॥ 5 ॥

यत्र व्यासेन सृष्टं महाभारतं,
रम्यरामायणं यत्र वाल्मीकिना।
कालिदासोऽवतीर्णो महान् यत्र तद् ,
मामकीनं प्रियं संस्कृतं भारतम्॥ 6 ॥


–डॉ. मनीषजुगरानः

# देवप्रयागमाहात्म्यम्

उत्तराखण्डप्रदेशः नैकेषां तीर्थानां पुण्यभूरस्ति। अत्र हि पदं पदं अलङ्करोति देवकादम्बः। ''पितुः प्रदेशास्तव देवभूमयः'' इति महाकवेः कालिदासस्य उद्घोषः जनं जनं रञ्जयति। तदारभ्य एवायं प्रदेशः देवभूमि इति नाम्नापि प्रसिद्धः वर्तते। हिमालयस्य हिमवेष्टित-धवलशृङ्गाणि, भागीरथीतीरतपोवनानि, भास्वन्ति रत्नानि गिरिनिर्झरापि अनोकहाकम्पितपुष्पगन्धिप्रभृतीनीति ककिलगुरु-महाकाव्यनिबद्धसिद्धवाक्यानि उत्तराखण्डस्य लोकोत्तरमहिमविषयेऽस्मान्-उपकुर्वन्ति। वस्तुतः पुराण-वाङ्मयस्य पृष्ठभूमौ बहुरचनाधर्मिभिः देवभूमिवैभवसम्बन्धिसाहित्यं विरचितमस्ति। महापुराणोपपुराणेषु च अनेकस्थलेषु उत्तराखण्डस्य विशदं वर्णनमुपलभ्यते। स्कन्दपुराणान्तर्गत-केदारखण्डे तु अत्रत्य-भूगोल-नदी-पर्वत-आश्रम-तीर्थ-वन्यजन्तु-जलजन्तु-पक्षिगण-सरीसृप-वनस्पति-पुष्प-औषधि-महर्षिवसतीनां च सविस्तरेण प्रतिपादनमुपलभ्यते।

पौराणिकदृष्ट्या बृहद्हिमालयक्षेत्रस्य पृथक्-पृथक् पञ्चखण्डाः (भूविभागाः) सन्ति। एतेषु नेपालकूर्माञ्चल-केदार-जलन्धर-कश्मीरप्रमुखाः विद्यन्ते। शारदा (काली) नदीतः पूर्वोत्तरभागः नेपालखण्डः, शारदानदीतः रामगङ्गापर्यन्तं पश्चिमोत्तरभागः कूर्माञ्चलखण्डः, कूर्माञ्चलस्य पश्चिमसीमातः गङ्गायमुनाप्रवाहवर्तिक्षेत्रं केदारखण्डः ततः पश्चिमदिशि जलन्धरखण्डः (हिमाचलप्रदेशः), ततोऽपि पश्चिमोत्तरसीमाक्षेत्रे कश्मीरखण्डः अवस्थितोऽस्ति। पुराणवर्णित-केदारखण्डः कूर्माञ्चलखण्डश्च सम्प्रति उत्तराखण्डप्रदेश इति नाम्नाऽभिधीयते। पौराणिककेदारखण्डस्तु हरिद्वारमारभ्य श्रीबदरीक्षेत्र-मानसोत्तरं यावत् वर्तते। अस्मिन् केदारखण्डे भगवतः शिवस्य कैलाशशिखर-केदारज्योतिर्लिङ्ग-गुप्तकाशी-कल्पेश्वर-तुङ्गनाथ-मध्यमेश्वरेत्यादिपुण्यक्षेत्राणि सन्ति। केदारमण्डलं यावत् पार्वतीश्वरस्य अन्तःपुरं वर्तते, अत्र हि भगवान् शिवः दिव्यक्रीडां कुरुते-

**केदारमण्डलं यावत् तावदन्तःपुरं स्मृतम्।**
**श्रीशिवस्य महाभाग क्रीडास्थानमिदं परम्।।** (स्क.के.ख. २०५/११)



अपरत्र गन्धमादनपर्वते भगदन्तौ नरनारायणौ श्री बदरिकाश्रमे तपश्चरतः। प्रतीयते यद् हिमालये हरिहरयोः-तत्वरूपाऽभिन्नतां दर्शयतः केदारखण्डस्य पञ्चप्रयागेषु प्रधानतमः देवप्रयागः, अलकनन्दा-भागीरथी-श्रीरघुनाथपादद्वन्द-सनाथितश्च तीर्थराडिति विलसति देवभूमौ। इत एव नदीद्वयं सङ्गम्य 'गङ्गा' इति चराचरपावनी सञ्जाता। पुराणेषु भारतं धन्यं, तत्रापि हिमालयः तदुपरि गङ्गायाः पुण्यक्षेत्रं, ततः विष्णुसन्निधिरिति-उत्तरोत्तरप्रकर्षं प्रतिपाद्यते-

**तत्र धन्यं महाभाग भारतं वर्षमीरितम्।**
**तत्र धन्यो महाभाग हिमवद्देशसंज्ञकः।।**

**तत्रापि धन्यास्ते देशाः यत्र गङ्गा सरिद्वरा।**
**हरेः सान्निध्यकं स्थानं तत्रापि हि मुनीश्वरः।।**

**एतत्सर्वं महाभाग देवतीर्थे हि विद्यते।**
**तस्मात्सर्व प्रयत्नेन तीर्थमेतदुपाश्रयेत्।।** (स्क.के.१४९/३९-४१)

पुरा कृतयुगे कश्चिद् देवशर्मनामा तापसः अस्मिन् तपोभूम्यां श्रीहरिप्रीत्यर्थं दुश्चरं तपस्तेपे। तपसा प्रसन्नो भगवान् तस्मै वरं प्रादात्। यदेतत् पुण्यक्षेत्रं सर्वाघवनदाहकं भविष्यति, तथा च तव हृदये सदैव भक्तिर्मे स्थास्यति। अहं त्रेतायुगे दाशरथी भूत्वा धर्मसंरक्षणार्थं रावणादीन् हत्वा किञ्चित्कालं राज्यं परिपाल्य अत्र आगमिष्यामि। त्वमत्रैव मम दर्शनं प्राप्स्यसि। एतत्क्षेत्रं त्वन्नामलक्षणान्वितं देवप्रयागमिति ख्यापयिष्यते।

**पुनर्मे दर्शनं प्राप्य गमिष्यसि परां गतिम्।**
**ततो देवप्रयागेति त्वन्नामलक्षणान्वितम्।।**
**ख्यातिमेतन्महत्तीर्थं गमिष्यति द्विजोत्तमः।** (स्क.के.१४९/६१)

देवप्रयागे श्रीबदरिकाश्रमतः अलकनन्दासरिदागच्छति तथा च गङ्गोत्तरीतः भागीरथी समागत्य, उभावपि प्रयागं कुर्वन्त्यः गङ्गासागरपर्यन्तं प्रवहतः। भौगोलिकरूपेण भागत्रये विभक्तः देवप्रयागः टिहरी-पौडीजनपदद्वयोः स्थितोऽस्ति। अलकनन्दायाः दक्षिणभागे

देवप्रयाग-परिचयः

टिहरी-वामभागे च पौडीजनपदस्य सीमाक्षेत्रं वर्तते। अत्र आग्नेय्यां नृसिंहाचल:, पश्चिमे दशरथाचल:, पूर्वस्यां गृद्धाचलश्च विराजन्ते। गृद्धाचले भगवत: रघुवंशमणे: रघुनाथस्य प्राचीनं भव्यं च मन्दिरं राजते। देवप्रयागस्य समुद्रतलत: २२६६ फिट परिमितमुत्तुङ्गता अस्ति। पुरातात्त्विकदृष्ट्याऽपि देवप्रयागस्य महत्त्वं वर्तते। श्रीरघुनाथमन्दिरस्य पृष्ठभागे शिलायामेकस्यां चत्वारिंशद् तीर्थयात्रिणां लेखा: ब्राह्मीलिप्यां उत्कीर्णा: सन्ति। डा. छाबडामहोदय: एतान् द्वितीयत: पञ्चमशताब्दी (खिस्ताब्दी) पर्यन्तं मन्यते (एपि.इ., खण्ड ३०,१९५३-५४)। इतिहासज्ञा: मन्यन्ते यद् अत्र शिलासु, भित्तिषु, घण्टापात्रेषु, ताम्रपत्रेषु च पंवारवंशीयराज्ञ: जगतपालस्य प्राचीन: (वि. सं. १५१२ वत्सरस्य) उल्लेख: अस्ति। (उत्तरा. इति. यशवन्त सिंह कठोच, पृ. २८, द्वि. सं. २०१०)। श्रीरघुनाथमन्दिरस्य निर्माणं १२-१३ ईस्वीयशताब्दौ केनचित् पंवारनृपतिना कृतम्। १८०३ ई. वत्सरे भूकम्पेन क्षतिग्रस्तमिदं मन्दिरं पुन: दौलतरावसिन्धिया निर्मितवान् (इम्पि. गजे. इं. १९०८ पृ. २७३, बाल्टन, गजे, गढ़. १९२१ पृ. २१५)

प्राचीनपुराणदृष्टि:, अर्वाचीनेतिहासदृष्टिश्च: भिन्ने स्त:। धर्मप्राणभारतीया: श्रद्धया पुराणं समाद्रियन्ते। भगवान् राघव: सीतया लक्ष्मणेन सह च देवप्रयागे वसति, प्रमाणवाक्यमिदं सर्वे स्वीकुर्वन्ति-

**इत्युक्त्वा भगवान्राम: तस्थौ देवप्रयागके।**
**लक्ष्मणेन सह भ्रात्रा सीतया सह पार्वती।।** (स्क.के. १४९/८०)

**-डॉ. शैलेन्द्रनारायणकोटियाल:**

## ।। श्रीबदरीनाथसुप्रभातम्।।

१. **लक्ष्मीविलास नरसिंह गुणाकरेश**
**वैकुण्ठ केशव जनार्दन चक्रपाणे।**
**भक्तार्तिनाशन हरे मधुकैटभारे**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

२. **लक्ष्मी: प्रसन्नवदना जगदाद्यशक्ति:**
**कृत्वाङ्गरागललितं सुमनोज्ञवेषा।**
**संस्तौति शव्वमधुरैर्मुरमर्दनं त्वां**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

३. **ब्रह्ममहेशगुरुकाव्यसरस्वती च**
**संप्राप्य तुङ्गहिमशृङ्गमये प्रदेशे।**
**संसेवयन्ति हि पदाम्बुजयुग्मकं ते**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

४. **इन्द्रादयस्सुरगणाश्च विमानदिव्यै:**
**प्राप्ता: कराञ्जलिपुटा भवदन्तिके हि।**
**उद्घोषयन्ति सततं जगदेकनाथं**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

५. **सूर्यादयो ग्रहगणा नभसस्थले च**
**दस्त्रादितारकगणैस्सहितास्सुनम्रा:।**
**मन्दारचम्पककरा बहुपुष्पयुक्ता:**
**द्रष्टुं बदर्यधिपते तव सुप्रभातम्।।**

६. **देवर्षिनारद सनन्दन योगिवर्या:**
**सप्तर्षयो भृगुमरीचिवसिष्ठमुख्या:।**
**द्वारे पठन्ति शुभवेदसुरम्यगाथां**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

७. **रम्भादयोऽप्सरगणा: सहनृत्तगीतै:**
**गन्धर्वतुम्पुरुमुखा: सहवाद्यघोषै:।**
**गायन्ति गीतसरसैरिह कीर्तिपुञ्जं**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

८. **श्रीशङ्करार्यमुनि मध्वमहायतीन्द्रा:**
**रामानुजार्य प्रभुवल्लभ देशिकेन्द्रा:**
**गाथा विरच्य निगमागम तत्त्वसारा:**
**नित्यं जगुस्तव यशो विमलं प्रभातम्।।**

९. **भास्वानुदेति विगता हिमशीतबाधा**
**स्नात्वा च वह्निसलिले खलु यात्रिणो हि।**
**नीत्वोपचारनिचया: प्रभुदर्शनार्थं**
**तिष्ठन्ति चत्वरमुखे तव सुप्रभातम्।।**

१०. **हैमेषु राजतमयेषु घटेषु नीत्वा**
**शीतोष्णतोयदधिदुग्धघृतादिकं च।**
**स्नानोन्मुखा द्विजवरास्सहवेदपाठै:**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

११. **पञ्चामृतेन सलिलेन सुगन्धद्रव्यै:**
**अभ्यङ्गनादि सुमनोहर सम्भृतैश्च।**
**सिञ्चन्ति चार्चकवरा: स्तुतिभिर्मनोज्ञै:**
**भूयात् बदर्यधिपते तव सुप्रभातम्।।**

१२. **श्रीखण्डचन्दन सुगन्धयुजा विलिप्य**
**कौशेवरत्नखचितैश्च सुकान्तिमद्भि:।**
**वस्त्रैर्वराभरणपुष्पचयैर्भवन्तं**
**आभूषयन्ति सततं तव सुप्रभातम्।।**

१३. **भोज्यानि षड्रसमयानि विधाय सूदा:**
**दध्योदनादि घृतपायसमिश्रितानि।**
**नित्यं प्रफुल्लमनसा विनिवेदयन्ति**
**तुभ्यं बदर्यधिपते तव सुप्रभातम्।।**

१४. **जाम्बूनदीय बहुमूल्यमयं सुपात्रं**
**आपूर्य मिश्रितघृतेन च वर्तिकाभि:।**
**नीराजनेन सहवाद्यमृदङ्गघोषै:**
**संतर्पयन्ति विबुधास्तव सुप्रभातम्।।**

१५. **दैत्यं सहस्त्रकवचं वरदानमत्तं**
**उन्मूलितुं सुरगणा बहुधाऽर्थयन्त:।**
**नारायणो नरसखोऽवततार भूमौ**
**संहत्य दानवपतिं विदधे प्रभातम्।।**

१६. **संसारसागरसमुत्तरणैक हेतो:**
**अष्टाक्षरं सकलसिद्धिकरं सुमन्त्रम्।**
**आविश्चकार जगदभ्युदयस्य सिद्धयै**
**क्षेमाय मानवगुणस्य हि सुप्रभातम्।।**

१७. **यो वै हरि: कृतयुगे बदरीवनेऽस्मिन्**
**तेपे तपो बहुजनस्य हिताय कृच्छ्रम्।**
**श्रीश्रीनिवास जगदेकदयैकसिन्धु:**
**कुर्याज्जनस्य सकलस्य स सुप्रभातम्।।**

१८. **इत्थं प्रभुं नरहरिं करुणाब्धिसेतुं**
**लक्ष्मीपतिं सुरगुरुं प्रणिपत्य मूर्ध्ना।**
**याचे मुदा द्विजवरो मुरलीधराख्यो**
**भद्रं करोतु सततं बदरीविशाल:।।**

**पं. मुरलीधरशास्त्री (देवप्रयाग:)**



# राष्ट्रियसंस्कृतसंस्थानम्

(समविश्वविद्यालयः)

## श्रीरघुनाथकीर्तिपरिसरः



देवप्रयागः, पौडी-गढवालः (उत्तराखण्डः) २४९ ३०१

सहर्षं सूचयामो यत् राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे ग्रन्थालस्योपविभागत्वेन आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य (Resource centre for Modern Sanskrit literature इत्यस्य) पाण्डुलिपि-संरक्षणानुसन्धानकेन्द्रस्य (Centre for manuscript presevation and Research इत्यस्य) च समुद्घाटनं भविष्यति। तयोः विषये काश्चन सूचनाः वर्तन्ते–

## आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रम्

## (Resource centre for Modern Sanskrit literature)

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरेण ग्रन्थालयस्य उपविभागत्वेन आधुनिकसंस्कृत-साहित्यसंसाधनकेन्द्रम् (Resource centre for Modern Sanskrit literature) इति किञ्चन केन्द्रं संस्थाप्यते। अस्मिन् संसाधनकेन्द्रे आधुनिककाले प्रणीताः सर्वविधाश्रिताः ग्रन्थाः पत्र-पत्रिकाश्च सङ्कलयिष्यन्ते।

जानन्ति एवं विज्ञाः यत् आधुनिककालः संस्कृतसाहित्यरचनायाः स्वर्णकालः इति। आधुनिकेऽस्मिन् काले सहस्रशः ग्रन्थाः प्रणीताः विद्वद्भिः। सः च रचनाप्रवाहो निरन्तरं वाहमानी वर्तते। किन्तु भारते न तादृशं किञ्चन स्थानं केन्द्रं वा वर्तते, यत्र एकत्रैव एते ग्रन्थाः समुपलभ्येयुः। तया दृष्ट्या केन्द्रमिदं नूनम् आधुनिकसंस्कृतसाहित्ये अनुसन्धित्सुनाम् अध्येतृणां च कृते महदुपयोगि भविष्यति।

विद्वांसः निवेद्यन्ते यत् ते स्वकीयाः प्रकाशिताः ग्रन्था अत्र निश्शुल्कतया प्रेषयन्तु आहोस्वित् स्वकीयरचनानां विवरणं (प्रकाशक-प्रकाशनवर्ष-मूल्यादिकं) परिसरसङ्केतेन प्रेषयन्तु इति।

## पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रम्

## (Centre for Manuscript Preservation and Research)

साम्प्रतमपि लक्षशः दुर्लभाः महत्त्वपूर्णाश्च हस्तलेखाः अप्रकाशिताः उपेक्षिताश्च यत्र-तत्र दुरवस्थायां सन्ति। जनानाम् अन्येषां वा गृहेषु बहूनां विदुषां केषुचित् संग्रहालेषु वा इमे हस्तलेखाः सन्ति येषां सम्पादनं प्रकाशनं च अत्यावश्यकं वर्तते। एतं हस्तलेखग्रन्थालयं समृद्धं कर्तुं न केवलम् उत्तराखण्डस्य किन्तु भारतवर्षस्य (विशेषतो देवप्रयागस्थानां केषाञ्चन गणमान्यानां कवीनां विदुषां च) निजसंग्रहात् ग्रन्थाः पाण्डुलिपयश्च संग्रहिष्यन्ते।

अनेन हि सम्पूर्णात् भारतवर्षाद् हस्तलेखाधारितं शोधकार्यं कर्तुं शोधार्थिनो विद्वांसो वा समागत्य लाभान्विताः भवेयुरिति। विद्वांसः निवेद्यन्ते यत् ते हस्तलेखान् अत्र निश्शुल्कतया प्रेषयन्तु आहोस्वित् तेषां विवरणं परिसरसङ्केतेन प्रेषयन्तु इति।

-प्राचार्यः

Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Pub. by the Principal for Shri Raghunath Kirti Campus, Devprayag, Uttrakhand & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007